< पञ्चमोऽङ्कः >

अभिज्ञानशाकुन्तलम्

(ABHIJÑĀNAŚĀKUNTALAM)

डॉ. वेद प्रकाश शास्त्री

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चमोऽङ्कः

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—अहो बत! कीदृशीं वयोऽवस्थामापन्नोऽस्मि।

आचार इत्यधिकृतेन मया गृहीता या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथे मम सैव जाता प्रस्थानविक्लवगतेरवलम्बनाय॥ १॥

(ततः=तदनन्तरम्, कञ्चुकी—कञ्चुकः=वारबाणोऽस्याऽस्तीति कञ्चुकी=अन्तःपुरचरो वृद्धविप्रविशेषः, प्रविशति=रङ्गे समापतति।)

कञ्चुकी—अहो=इत्याश्चर्ये, बत इति खेदे, कीदृशीम्=अवर्णनीयां, वयोऽवस्थां=वार्धक्य-कृतां दशाम्, आपन्नोऽस्मि=प्राप्तोऽस्मि।

अन्वयः—राज्ञः अवरोधगृहेषु अधिकृतेन मया आचारः इति हेतोः या वेत्रयष्टिः गृहीता बहुतिथे काले गते सैव प्रस्थानं विक्लवगतेः अवलम्बनाय जाता॥ १॥

आचार इति। राज्ञः=दुष्यन्तस्य, अवरोधगृहेषु=अन्तःपुरगृहेषु, अधिकृतेन=अध्यक्षतया नियुक्तेन, मया=अशक्तेन कञ्चुकिना, आचारः=अस्माकं कञ्चुकिनामयं व्यवहारः, इति हेतोः, (साधारणपुरुषोत्सारणाद्यर्थमवरोधाधिकृतानां वेत्रयष्टिग्रहणस्याचारत्वादित्यर्थः, न तु शरीरदौर्बल्यादि हेतुना) या वेत्रयष्टिः=वेत्रदण्डः, गृहीता=पूर्वं धृता, बहुतिथे=अत्यधिके, काले=आयुर्लक्षणे, गते=अतीते (पूर्णवार्धक्ये प्रविष्टे सति), सैव=आचारगृहीतैव वेत्रयष्टिः, प्रस्थाने=स्थानान्तरप्राप्ति-काले, विक्लवा=विवशा, गतिः=पादविन्यासः, यस्य तस्य स्थानविक्लवगतेः=स्खलितचरणस्य मम, अवलम्बनाय=आश्रयाय, जाता=अभूत्। अत्र पदार्थहेतुकं काव्यलिङ्गम्। वसन्तलिकं वृत्तम्॥ १॥

भावार्थः—या यष्टिः मया पूर्वं स्वकीयाचाररक्षणाय धृता सैवाधुना आश्रयाय जाता। तथा च सम्प्रतीदृक् वृद्धत्वमापन्नं, यद्देहदौर्बल्यात् यष्टिं विना एकमपि पदं चलितुं न शक्नोमीति भावः॥ १॥

(इसके पश्चात् कञ्चुकी का प्रवेश)

कञ्चुकी—हाय! आज मैं किस प्रकार अवस्था के फेर में पड़ गया हूँ—

राजा के अन्तःपुर के अध्यक्ष रूप में नियुक्त होकर (सामान्य लोगों के प्रवेश को रोकने के लिए) मैंने छड़ी हाथ में पकड़ी थी, परन्तु बहुत समय बीत जाने के बाद चलने में विवश हो जाने के कारण वही छड़ी मेरे लिए सहारा बन गई है॥ १॥

(Then enter the chamberlain)

***Chamberlain*—**Alas! I am indeed reduced to such a state. Being appointed in the inner apartments of the king's harem, that very cane-staff, which was taken by me, because it was the custom, has, much time having elapsed, become useful for the support for me, whose gait is faltering in walking. (1)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यावदभ्यन्तरगताय देवाय स्वमनुष्ठेयमकालक्षेपार्हं निवेदयामि। (स्तोकमन्तरं गत्वा) किं पुनस्तत्? (विचिन्त्य) आं ज्ञातम्, कण्वशिष्यास्तपस्विनो देवं द्रष्टुमिच्छन्ति। भोः! चित्रमेतत्।

क्षणात् प्रबोधमायाति लङ्घ्यते तमसा पुनः।
निर्वास्यतः प्रदीपस्य शिखेव जरतो मतिः॥ २॥

(परिक्रम्यावलोक्य च) एष देवः—

यावदिति वाक्यालङ्कारे, अभ्यन्तरगताय=अन्तःपुरस्थिताय, देवाय=राज्ञे, स्वम्=आत्मसम्बन्धीयम् (तदीयम्), अनुष्ठेयम्=कर्तव्यम्, अकालक्षेपार्हम्=विलम्बासहम्, निवेदयामि=सूचयामि। (स्तोकम्=अल्पम्, अन्तरं=दूरं गत्वा) किं पुनस्तत्=यन्निवेदयामि तदनुष्ठेयं पुनः किमिति भावः, (विचिन्त्य=विचार्य्य) आं ज्ञातम्=स्मृतम्, कण्वशिष्यास्तपस्विनो देवं=राजानं, द्रष्टुम्=अवलोकयितुं, इच्छन्ति=वाञ्छन्ति। भोः इति विषादे, एतत्=क्षणात् विस्मरणं स्मरणञ्च, चित्रम्=आश्चर्यम्।

अन्वयः—जरतः मतिः निर्वास्यतः प्रदीपस्य शिखेव क्षणात् प्रबोधम् आयाति, पुनः क्षणात् तमसा लङ्घ्यते॥ २॥

क्षणादिति। जरतः=जराक्रान्तस्य वृद्धजनस्य, मतिः=बुद्धिः, निर्वास्यतः=निर्वाणं प्राप्स्यतः, उपमेयपक्षे—अचिरं मरिष्यतः, प्रदीपस्य शिखेव, क्षणात्, प्रबोधम्=उन्मेषं दीप्तिञ्च, आयाति=प्राप्नोति, पुनः क्षणात्, तमसा=मोहेन अन्धकारेण वा, च, लङ्घ्यते=आव्रियते, एतच्चित्रम्। अत्र श्लेषानुप्राणितोपमालङ्कारः। पथ्यावक्त्रं वृत्तम्॥ २॥

भावार्थः—वृद्धस्य मतिः प्रदीपस्य शिखा इव क्षणात् प्रबोधमुन्मेषं दीप्तिं वा प्राप्नोति पुनः क्षणात् मोहेन (तमसा) आव्रियते इति चित्रम् एव सर्वथा प्रतिभाति॥ २॥

(परिक्रम्य=किञ्चित् पादन्यासं कृत्वा, अवलोक्य च=राजानं च दृष्ट्वा) एष देवः=समीपतर इत्यर्थः, अस्य अग्रिमेण श्लोकेन सह सम्बन्धः—

तब तक मैं भीतर गये हुए महाराज से अविलम्ब सूचनीय कार्य सूचित कर दूँ। **(कुछ भीतर जाकर)** अरे वह क्या (कार्य) था? **(सोचकर)** ओह! याद आ गया। कण्व महर्षि के शिष्य कुछ तपस्वी स्वामी के दर्शन करना चाहते हैं। अरे यह कितनी विचित्र बात है कि—

बुझने वाले दीपक की शिखा के समान बूढ़ों की बुद्धि भी क्षणभर में ज्ञान (प्रकाश) सम्पन्न तथा क्षणभर में अन्धकार (मोह) ग्रस्त हो जाती है॥ २॥

(घूमकर तथा (राजा को) देखकर) यह महाराज—

Let me fulfil my duty by reporting to his majesty, who had gone into inner apartment of his harem. *(Entering to some extent)* Oh, what was that work? *(Remembering)* Oh, I rember. Some hermit pupils of sage Kaṇva wants to see his majesty. How strange is this—

Like the flame of a lamp, the talent of the aged people become in a very moment very bright and in the next moment very dark (dull) due to delusion. (2)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवते श्रान्तमना विविक्तम्।
यूथानि सञ्चार्य रविप्रतप्तः शीतं गुहास्थानमिव द्विपेन्द्रः ॥ ३ ॥

भोः! सत्यं धर्मकार्यमनतिपात्यं देवस्य, तथापि शङ्कितवानस्मि इदानीमेव धर्मासनादुत्थिताय देवाय कण्वशिष्यागमनं निवेदयितुम्। अथवा कुतो विश्रामो लोकपालानाम्? तथाहि—

अन्वयः—स्वाः प्रजा इव प्रजाः तन्त्रयित्वा श्रान्तमनाः एष देवः यूथानि सञ्चार्य रविप्रतप्तः द्विपेन्द्र शीतं विविक्तं निषेवते ॥ ३ ॥

प्रजा इति। स्वाः=स्वकीयाः, प्रजाः=सन्ततीरिव, प्रजाः=स्वाधिकारवासिनो जनान्, तन्त्रयित्वा=तेषां नियन्त्रणं विधाय, शासनेन साधुपथे स्थापयित्वा, श्रान्तं=परिश्रान्तिमत्, मनो यस्य सः श्रान्तमनाः=उद्विग्नचित्तः सन्, एष देवः=राजा दुष्यन्तः, यूथानि=स्ववर्ग्यान् गजान्, सञ्चार्य्य= आहारविहारादिकार्येषु यथास्थाने व्यापार्य, रविणा प्रतप्तः रविप्रतप्तः=सूर्यतापितः, द्विपेन्द्रः= गजराजः, शीतं=शीतलं, गुहास्थानम्=पर्वतकन्दरम्, विविक्तम्=विजनम्, निषेवते=अधिवसति। अत्र यमकोपमालङ्कारौ, उपजातिः वृत्तम् ॥ ३ ॥

भावार्थः—यथा कश्चिद् गजराजः स्ववर्ग्यान् गजान्—आहारविहारादिव्यापारेषु यथास्थाने व्यापार्य सूर्यतापेन तापितः सन् शीतलं गुहास्थानम् एकाकी एव निषेवते तथैव एषः दुष्यन्तः स्वकीयाः सन्ततीरिव स्वाधिकारवासिनो जनान् स्वकीयोत्तमं शासनेन साधुपथे स्थापयित्वा उद्विग्नचित्तः सन् अत्र एकान्ते अधिवसति ॥ ३ ॥

भोः! सम्बोधने, देवस्य=राज्ञो दुष्यन्तस्य, धर्मकार्यं=धर्मार्थं कर्म, अतिपातोऽत्ययः= कालक्षेपः, तस्यार्हमित्यतिपात्यं तदन्यदनतिपात्यम्=अनतिक्रमणीयमिति अनतिपात्यं=झटिति निवेद्यमिति भावः (मयेति शेषः)। इति सत्यं=स्वीकरोमि इत्यर्थः, इदानीमधुनैव, धर्मासनाद्=

जैसे गजराज अपने साथ के दूसरे हाथियों को उपयुक्त स्थान पर पहुँचाकर (विभिन्न कार्य जैसे आहर विहारादि में लगा) स्वयं धूप से सन्तप्त होकर शीतल पर्वत की गुफा में जाकर आराम करता है, उसी प्रकार ये महाराज भी अपनी सन्तान के समान प्रिय प्रजा को ठीक मार्ग पर लगाकर स्वयं उद्विग्न हो जाने के कारण यहाँ एकान्त का सेवन कर रहे हैं ॥ ३ ॥

अरे! हमारे प्रभु धर्मकार्य का कभी भी उल्लंघन नहीं करेंगे, यह सत्य है तथापि अभी-अभी न्यायासन से उठे हुए महाराज को कण्व के शिष्यों के आगमन की सूचना देते हुए शङ्का होती है। अथवा—लोकपालों को भला विश्राम कहाँ? क्योंकि—

(Walking round and observing) Here his majesty. Having looked after the subjects as after his own children, is enjoying solitude with his mind fatigued, as the chief of the elephants scorched by the sun, resorts to a cool cave of a mountain after engaging his herd in some proper place and work. (3)

Oh! true it is that his majesty can not set aside a religious duty. Yet I do not feel inclined to report to him who has just now risen from his judgement-seat, the arrival of Kaṇva's pupils,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भानुः सकृद्युक्ततुरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥ ४ ॥

(इति परिक्रामति।)

(ततः प्रविशति राजा विदूषको विभवतश्च परिवारः)

राजा—(अधिकारखेदं निरूप्य) सर्वः प्रार्थितमधिगम्य सुखी सम्पद्यते जन्तुः; राज्ञान्तु चरितार्थता दुःखोत्तरैव। कुतः—

विचारासनात्, उत्थिताय=उत्थायारब्धविश्रामाय, देवाय=राज्ञे दुष्यन्ताय, कण्वशिष्यागमनं, निवेदयितुं=सूचयितुं, शङ्कितवानस्मि=भीतोऽस्मि। अथवा—लोकपालानां=जगत्पालयितॄणां राज्ञां, विश्रामः=परिश्रमापनोदं, कुतः ? तथाहि—

अन्वयः—भानुः सकृत् युक्ततुरङ्ग एव तथा गन्धवहः रात्रिन्दिवं प्रयाति, शेषः सदैव आहितभूमिभारः (तिष्ठति) तथैव षष्ठांशवृत्तेः अपि एषः धर्मः ॥ ४ ॥

भानुरिति। भानुः=सूर्यः, सकृत्=जीवनकाले एकवारमेव, युक्ताः=विश्वभ्रमणाय रथे नियमिताः, तुरङ्गाः=अश्वाः, येन सः युक्ततुरङ्गः, एव (तिष्ठति), तथा, गन्धवहः=पवनः, रात्रिश्च दिवा च द्वयोः समाहारः रात्रिन्दिवम्=अहोरात्रमेव, प्रयाति=प्रवहति, तथैव, शेषः=नागराजः, सदैव, आहितः=धृतः, भूमिभारो येन सः आहितभूमिभारः, वहति, तथैव, षष्ठांशः=प्रजोत्पादितद्रव्यस्य षष्ठो भागः, स एव वृत्तिः=जीविका, यस्य तस्य षष्ठांशवृत्तेः=राज्ञः अपि, एषः=सततपरिश्रमरूपः, धर्मः=आचारः। अत्र मालाप्रतिवस्तूपमालङ्कारः। इन्द्रवज्रा वृत्तम् ॥ ४ ॥

भावार्थः—सूर्यगन्धवहादीनामिव राज्ञ अपि अविरतपरिश्रमरूप एव धर्मः। राज्ञः कथञ्चिदपि विश्रामासम्भवादनिवार्यमेव कण्वशिष्यागमनं निवेदयितुमर्हामीत्याशयः ॥ ४ ॥

(इति=एवमुक्त्वा, परिक्रामति=पादक्रमं करोति।)

(ततः=तत्पश्चात्, प्रविशति=रङ्गे समायाति, राजा, विदूषकः, विभवतः=ऐश्वर्यानुसारात्, परिवारः।)

जैसे सूर्य के रथ में एक बार ही घोड़े जोते गये हैं तथा जैसे वायु दिन-रात प्रवाहित होता है एवं जैसे शेषराज सदा भू-भार वहन करते हैं वैसे ही प्रजा से षष्ठांश-आय प्राप्त करने वाले राजा का भी धर्म है (कि वह विश्राम शब्द को ही भूला दे) ॥ ४ ॥

(ऐसा कहकर घूमता है)

(इसके पश्चात् राजा-विदूषकादि का वैभव युक्त परिवार सहित प्रवेश।)

(which will again causes him disturbance) or there is no rest for the kings. Why—

The sun has his horses yoked but once; the wind blows day and night, Śeṣa the king of serpents has the load of the earth placed on him for ever, such is the duty also of him whose sustenance is on the sixth part of the production of the people i.e. sixth part of revenue. (4) *(Walking round)*

(Then enter the king with jester with luxurious family)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

औत्सुक्यमात्रमवसादयति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेव।
नातिश्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम्॥ ५॥

राजा—(अधिकारखेदं=स्वकर्त्तव्यनिबन्धनं, निरूप्य=नाटयित्वा) सर्वः=समस्तो जन्तुः, प्रार्थितम्=अभिलषितम्, अधिगम्य=लब्ध्वा, सुखी=प्रसन्नः, सम्पद्यते=भवति। तु=परन्तु, राज्ञां=नृपाणाम्, चरितार्थता=कृतकार्यता, दुःखमेवोत्तरं यस्याः सा दुःखोत्तरा=दुःखमात्रप्रधाना एव (अन्येभ्यो राजानो निकृष्टतरा इत्याशयः)। कुतः—

अन्वयः—प्रतिष्ठा औत्सुक्यमात्रम् अवसादयति, ततः लब्धपरिपालनवृत्तिः क्लिश्नाति। अतः स्वहस्तधृतदण्डम् आतपत्रमिव राज्यं यथा श्रमाय भवति तथा अतिश्रमापनयनाय न भवति॥ ५॥

औत्सुक्येति। प्रतिष्ठा=ख्यातिः, औत्सुक्यमात्रम्=केवलामुत्कण्ठाम्, अवसादयति=समापयति, ततः, लब्धस्य=प्राप्तस्य, परिपालनवृत्तिः=अभिरक्षणव्यापारः, क्लिश्नाति=पीडयत्येव, अतः=अस्माद्धेतोः, स्वहस्तेन धृतो दण्डो यस्य तत् स्वहस्तधृतदण्डम्, आतपत्रं=छत्रमिव, राज्यं, यथा=येन रूपेण, श्रमाय=परिश्रमाय, भवति, तथा=तेन रूपेण, अतिश्रमापनयनाय=श्रमस्यातिप्रशमनाय, न भवति (राज्यं यत्परिमितं श्रममुत्पादयेत् तत्परिमितं श्रमं नैव नाशयेदिति भावः।) अत्र वाक्यार्थहेतुकं काव्यलिङ्गम् उपमा च। वसन्ततिलकं वृत्तम्॥ ५॥

भावार्थः—ख्यातिः केवलमुत्कण्ठामेव समापयति, ततः प्राप्तस्य परिपालनवृत्तिः क्लिश्नाति। अतः स्वकीयकरगृहीतदण्डम् आतपत्रमिव राज्यं यथा परिश्रमाय भवति तथाऽतिशयेन श्रमापनयनाय; आनन्दप्राप्तये न भवति॥ ५॥

राजा-(अधिकार से खिन्न होने का भाव प्रगट करते हुए) संसार के सभी प्राणी अपनी अभिलषित वस्तु पाकर सुखी होते हैं, किन्तु राजाओं की अभीष्ट पूर्ति उत्तरोत्तर दुःखदायिनी ही होती जाती है, क्योंकि—

प्रतिष्ठा (नवराज्योपलब्धिपरक) केवल उत्कण्ठा को शमित करती है परन्तु प्राप्त की हुई प्रतिष्ठा के परिपालन में बुरी तरह कष्ट भोगना होता है। अतः (मेरे विचार में) राज्य हाथ में पकड़े हुए छत्र के दण्ड के समान होता है, वह जितना परिश्रम कराता है उतना सुख नहीं पहुँचाता॥ ५॥

The king—(Gesticulating the fatigue of his office) Every being becomes happy on attaining the desired object. But in the case of kings the state of having their desired objects achieved is only followed by trouble.

Attainment of the desired object destroys all eagerness; the very business of guarding what has been obtained worries. A kingdom, the administration of which is in one's own hands, is not for the complete removal of fatigue as it is for (causing) fatigue, like an umbrella, the pole of which is held in one's own hand. (5)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(नेपथ्ये वैतालिकौ—) जयति जयति देवः।

एकः— स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते सृष्टिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम्॥ ६॥

नेपथ्ये—रङ्गस्य पृष्ठभागे, वैतालिकौ=स्तुतिपाठकौ, देवः=अस्माकं राजा दुष्यन्तः, जयति जयति=सर्वोत्कर्षेण वर्तताम्।

एकः—अन्वयः—प्रतिदिनं (त्वम्) स्वसुखनिरभिलाषः लोकहेतोः खिद्यसे अथवा ते सृष्टिः एवंविधा एव। हि पादपः मूर्ध्ना तीव्रं उष्णम् अनुभवति किन्तु संश्रितानां छायया शमयति॥ ६॥

स्वसुखेति। प्रतिदिनं=सर्वदैव, (त्वम्) स्वस्य-आत्मनः, यत्सुखं=सुखानुभवः, तत्र निरभिलाषः=निस्पृहः सन्, लोकहेतोः=प्रजानां सुखसाधनार्थम्, खिद्यसे=खेदं प्राप्नोषि, अथवा—नैतमद्भुतमित्यर्थः, ते=तव, सृष्टिः=विधातृनिर्माणम्, एवंविधा=एवंप्रकारैव, (परसुखोत्पादनपरैव। दृष्टान्तैष स्वकीयं कथनं पोषयति=अनुभवतीति) हि=तथाहि, पादपः=वृक्षः, मूर्ध्ना=शिखरेण, तीव्रं=दुःसहम्, प्रखरम्, उष्णम्=आतपम्, अनुभवति=सहते, किन्तु छायया=छायादानेन, संश्रितानाम्=आत्मानमाश्रितानां जनानाम्, परितापं=सन्तापं, शमयति=नाशयत्येव। अत्र दृष्टान्तालङ्कारः स्वभावोक्तिश्च। मालिनी नाम वृत्तम्॥ ६॥

भावार्थः—यथा हरितः पादपः स्वशिरसा असह्यमातपमुत्तोलयन् स्वकीयसघनछायादानद्वारा स्वकीयाधोभागे आश्रितानां सन्तापं निवारयति, तथा त्वमपि खिद्यमानात्मा सन् सामादिप्रयोगद्वारा परखेदमपनयसीत्याशयः॥ ६॥

द्वितीय—(अपरः वैतालिकः)—

(नेपथ्य में दो वैतालिक) महाराज़ की जय हो, जय हो।

एक—आप, अपने सुख से निंस्पृह रहकर अपनी प्रजा को सुखी बनाने के लिए सदा परिश्रमरत रहतें हैं अथवा भगवान् ने आपका निर्माण ही इसी उद्देश्य से किया है। जैसे वृक्ष स्वयं अपने सिर पर असह्य धूप को सहन करता है और अपनी छाया में बैठे हुए के ताप को दूर कर देता है (ठीक वही दशा आपकी है)॥ ६॥

दूसरा वैतालिक—आप राजदण्ड धारण करके कुमार्गगामियों का नियन्त्रण करते हैं,

---

(Behind the scene two bards) May your majesty he victorious.

First bard—Indifferent to your own happiness, you toil every day for the sake of the people, or your life is just of this kind. Indeed, the tree suffers with its head intense heat, while it relieves by its shade the fatigue of those that resort to it. (6)

Second bard—Holding the power of punishment you

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयः— नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय।
अतनुषु विभवेषु ज्ञातयः संविभक्ता-
स्त्वयि तु परिसमाप्तं बन्धुकृत्यं जनानाम्॥ ७॥

राजा—(आकर्ण्य साश्चर्यम्) एतेन कार्यानुशासनपरिश्रान्ताः पुनर्नवीकृताः स्मः।

विदूषकः—(विहस्य) भो! गोविंदारअत्ति भणिदस्स विसभस्स किं परिस्समो णस्सदि? [**भोः! गोवृन्दारकेति भणितस्य वृषभस्य किं परिश्रमो नश्यति?**]

अन्वयः—आत्तदण्डः सन् विमार्गप्रस्थितान् नियमयसि, विवादं प्रशमयसि तथा रक्षणाय कल्पसे। तथा ज्ञातयः अतनुषु विभवेषु संविभक्ता तु जनानां बन्धुकृत्यं त्वयि परिसमाप्तम्॥ ७॥

नियमयसीति। आत्तः=गहीतः, दण्डो येन सः आत्तदण्डः=धृतराजदण्डः, सन्, विमार्गे=कुपथे, प्रस्थितान्=प्रवृत्तान्, विमार्गप्रस्थितान्, नियमयसि=नियन्त्रयसि, कुमार्गान्निवर्त्तयसि, विवादं=विरोधं कलहं वा, प्रशमयसि=निवारयसि, तथा रक्षणाय=दैवमानुषाद्यापद्भ्यः, प्रजानां पालनाय वा, कल्पसे=प्रभवसि। तथा ज्ञातयः=स्वजनाः, अतनुषु=प्रभूतेषु, विभवेषु=धनधान्यादिषु विषये, संविभक्ताः=सम्यग् विभज्य त्वया विवादान्निवर्तिताः, (क्वचित् 'सन्तु नाम' इति पाठान्तरम्, तत्र—नामेति सम्भावनायाम्, सन्तु=भवन्तु इत्यर्थः) तु=परन्तु, जनानाम्=प्रजानाम्, बन्धुकृत्यं=बन्धूचितं कर्म, त्वयि=त्वय्येव, परिसमाप्तम्=पर्य्यवसितम् (सर्वतोभावेन तेषां हितसाधनात् इति भावः)। अत्र वाक्यार्थहेतुकं काव्यलिङ्गं दीपकञ्चालङ्कारौ। मालिनी नाम वृत्तम्॥ ७॥

भावार्थः—राजदण्डं धृत्वा त्वया कुमार्गगामीनां नियन्त्रणं विधाय पारस्परिकं विरोधं शमयित्वा, दैवमानुषाद्यापद्भ्यः स्वकीयां प्रजां परिरक्ष्य, स्वजनाः प्रभूतेषु धनधान्यादिषु विषये विभज्य त्वया विवादान्निवर्त्तिताः। अत एव सर्वतोभावेन तेषां हितसाधनात् बन्धुकृत्यं त्वय्येव पर्यवसितम्॥ ७॥

राजा—(आकर्ण्य=श्रुत्वा, साश्चर्यम्=सविस्मयम्) एतेन=वैतालिककथनेन, कार्य्यानुशासनेन=राजकर्मचारिषु कर्त्तव्योपदेशेन, परिश्रान्ताः=परिश्रमणोद्यमविक्लवाऽपि वयम्, पुनर्नवीकृता स्म=पुनर्नवोद्यमीकृताः स्म।

विवाद को मिटाते हैं तथा जनसामान्य की रक्षा करते हैं। भाई-बन्धुओं में विवाद होने पर आप सब स्वजनों को प्रभूत धन देकर विवाद समाप्त करा देते हैं। इस प्रकार प्रजा के हितार्थ भाई का कार्य आप ही सम्पादित करते हैं॥ ७॥

राजा—(सुनकर आश्चर्यपूर्वक) इसे सुनकर शासनकार्य से जो थकावट आ गई थी, वह समाप्त हो गई और मेरा उत्साह फिर से नया हो गया।

विदूषक—(हँसकर) अरे! यदि बैल को वृषभराज (यूथयति) कह दिया जाय तो क्या उसकी थकान मिट जायेगी?

---

restrain those who have accepted a wrong way, settle disputes and contribute to protection. Let there be kinsman for sooth when riches are abundant, but in you is consummated the duty of a relative for the subjects. (7)

The king—(Hearing with surprise) Hearing this, my tiredness has disappeared and we are again fresh.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(सस्मितम्) ननु क्रियतामासनपरिग्रहः।

(उभावुपविष्टौ, परिजनश्च यथास्थानं स्थितः।)

(नेपथ्ये वीणाशब्दः)

विदूषकः—(कर्णं दत्त्वा) भो वअस्स! संगीदसालब्भंतरे कण्णं देहि, ताल-लअसुद्धाए वीणाए सलसंजोओ सुणीअदि। जाणे तत्थभोदी हंसवदी वण्णपरिचअं करेदि त्ति। **[भो वयस्य! सङ्गीतशालाभ्यन्तरे कर्णं देहि, ताललयशुद्धाया वीणायाः स्वरसंयोगः श्रूयते। जाने तत्रभवती हंसवती वर्णपरिचयं करोतीति।]**

विदूषकः—(विहस्य=मध्यमं हासं कृत्वा) भोः। इति सम्बुद्धिः, गवां वृन्दारकः= यूथपतिः, गोवृन्दारकः, इति भणितस्य=इति कथनमात्रेण, प्रशंसितस्य वृषभस्य, किं परिश्रमो नश्यति=शाम्यति ? कथमपि नेत्यर्थः।

राजा—(सस्मितम्=सेषद्धासम्) ननु इति अनुज्ञायाम्, आसनपरिग्रहः=आसनोपवेशनम्, क्रियताम्।

(उभौ=राजा-विदूषकौ, उपविष्टौ, परिजनश्च=अनुचरवर्गश्च, यथास्थानम्=उपयुक्तस्थाने, स्थितः।) (नेपथ्ये=यवनिकाभ्यन्तरे, वीणाशब्दः।)

विदूषकः—(कर्णं दत्त्वा=श्रवणाय श्रोत्रं निधायेत्यर्थः) भो वयस्य=मित्र! सङ्गीतं='नृत्यं गीतञ्च वाद्यञ्च त्रयं सङ्गीतमुच्यते' इति लक्षणलक्षितं, तदर्था शाला=गृहम्, इति सङ्गीतशाला, तस्या अभ्यन्तरे=अन्तर्भागे, कर्णं देहि=श्रवणाय श्रोत्रं निधेहि। तालः=गीतस्य कालक्रियामानम्, लयः=गीतवाद्ययोः साम्यम्, ताभ्यां शुद्धायाः=निर्दोषायाः, ताललयशुद्धायाः, वीणायाः=वल्लक्याः, स्वरैः=षड्जादिभिः, संयोगः=सम्यग् योजना, स्वरसंयोगः, श्रूयते=आकर्ण्यते। जाने=मन्ये, तत्रभवती=माननीया, हंसवती=तन्नामिका, वर्णस्य=सा-रे-ग-म इति वर्णस्य, परिचयम्=अभ्यासं, करोति।

राजा—(मुस्कराकर) आप आसन ग्रहण कीजिए।

(दोनों बैठते हैं और परिजन यथास्थान खड़े रहते हैं।)

(परदे के पीछे वीणा की ध्वनि)

विदूषक—(कान देकर) मित्र! जरा संगीतशाला के भीतर कान दीजिए। ताल-लय से शुद्ध वीणा का स्वर सुनायी देता है। जान पड़ता है माननीया हंसवती संगीत के वर्णों का अभ्यास कर रही हैं।

Jester—(With a smile) Dear if I call a bull the king of bulls, will his fatigue disappeare?

The king—(With a smile) Please occupy your seat.

(Both sit, retinue remain at proper places)

(Behind the scene the sound of Veenā i.e. the lute appears)

Jester—(listening) Dear, please divert your ears towards the inner portion of the concert hall, the correct sound of the lute coming forth. It seems that her majesty Haṁsavatī making practice of letters of music.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—तूष्णीम्भव, यावदाकर्णयामि।

कञ्चुकी—(विलोक्य) अन्यासक्तो देवः, तदवसरं प्रतिपालयामि।

(इत्येकान्ते स्थितः)

(नेपथ्ये गीयते)

अहिणव-महु-लोह-भाविदो तह परिचुंबिअ चूअमंजरिं।
कमलवसदिमेत्तणिव्वुदो महुअर विह्मरिदोसिणं कहं॥ ८॥

[अभिनवमधुलोभभावितस्तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर! विस्मृतोऽस्येनां कथम्॥ ८॥]

राजा—तूष्णीम्भव=मौनी भव, यावत्=यत्कालमभिव्याप्य, आकर्णयामि=शृणोमि।

कञ्चुकी—(विलोक्य=राजानं दृष्ट्वा) अन्यासक्तः=अन्यस्मिन् विषये कृतमनोयोगः, देवः=प्रभुः दुष्यन्तः, तत्=तस्मात्, अवसरं=निवेदनावकाशम्, प्रतिपालयामि=प्रतीक्षिष्ये। (इति=एवं विचार्य, एकान्ते=एकस्मिन् निर्जने भागे, स्थितः।)

(नेपथ्ये=यवनिकाभ्यन्तरे गीयते)

अन्वयः—मधुकर! अभिनवमधुलोभभावितः सन् तथा चूतमञ्जरीं परिचुम्ब्य इदानीं कमलवसतिमात्रनिर्वृतः एनां कथं विस्मृतोऽसि॥ ८॥

अभिनवेति। हे मधुकर=भृङ्ग! अभिनवस्य=अचिरोद्भूतस्य, मधुनः=रसस्य, लोभेन भावितः=विमोहितः सन्, (अपरत्र) अभिनवस्य=नवलतरुणीजनस्य, मधुनः=मधुरिमसुरतस्य, लोभेन भावितः=विमोहितः, अभिनवमधुलोभभावितः सन्, तथा=तेन प्रकारेण (यथा स्वाभिलाषपूर्त्तिर्भवति तथैव सर्वतोभावेन), चूतमञ्जरीम्=आम्रमञ्जरीम्, अन्यत्र परमरमणीयां

राजा—जरा मौन रहो जिससे सुन सकूँ।

कञ्चुकी—(**देखकर**) अभी महाराज अन्य कार्य में व्यस्त हैं, तब तक मैं समय की प्रतीक्षा करता हूँ। (**यह कहकर एक ओर ठहरता है।**)

(**नेपथ्य में गायन होता है**)

ओ भ्रमर! तुमने नूतन रस के लोभ में पड़कर आम की मञ्जरी को चूमा था, अब केवल कमल पर निवास करने से सन्तुष्ट होकर उस आम की मंजरी को तुम क्यों भुला बैठे हो?॥ ८॥

The King—Please keep quiet, so that I may hear it clearly.

Chamberlain—*(Observing)* At present his majesty the king is bussy with some other work, so I will wait for the suitable time (to tell). *(saying so, stands at one place)*

(A song arises behind the scene)

O' bee! due to covetousness you have just kissed the cluster or flower buds of a mango tree but now being satisfied with residing on the lotus flower. Why have you forgotten the cluster of the mango? (8)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—अहो! रागपरिवाहिणी गीतिः।

विदूषकः—भो वअस्स! किं दाव से गीदिआए अवि गहीदो भअदा अक्खरत्थो? **[भो वयस्य! किं तावदस्या गीतिकाया अपि गृहीतो भवता अक्षरार्थः ?]**

राजा—(सस्मितम्) सकृत्कृतप्रणयोऽयं जन इत्यक्षरार्थः। तदहं देवीं हंसवती-मन्तरेण उपालम्भनमागतोऽस्मि। सखे! माधव्य! मद्वचनादुच्यतां देवी हंसवती, सम्यगुपालब्धोऽस्मीति।

रमणीम्, परिचुम्ब्य=आस्वाद्य, इदानीम्=अधुना, कमले=पद्मे, वसतिमात्रेण=केवलावस्थित्या न तु मधुरास्वादनेनेति भावः, निर्वृतः=सन्तुष्टः सन्, अपरत्र-कमले=परिणतवयस्तया कमलवत्सुदृश्यमात्रे न तु रसभरिते अन्यमहिलाजने, वसतिमात्रेण=केवलावस्थित्या, निर्वृतः=सन्तुष्टः सन्, एनां=क्षण-मास्वादितरसाम्, चूतमञ्जरीम्, अन्यत्र—परिचुम्बितपूर्वां शकुन्तलां हंसवतीं वा, कथं विस्मृतो-ऽसि=विस्मर्तुमारभमाणोऽसि। अत्र अपरवक्त्रं नाम वृत्तम्॥ ८॥

भावार्थः—अभिनवसुखकरवस्तुनः सर्वथैव विस्मरणीयत्वात् तवायं विस्मरणप्रकारोऽ-त्यन्तनिन्द्य इति भावः॥ ८॥

राजा—अहो=इत्याश्चर्ये, रागपरिवाहिणी=अतिहृद्या, गीतिः=गानम्।

विदूषकः—भो वयस्य! तावत्, किं भवता=त्वया, अस्याः=गीतिकायाः ज्ञानस्य, अपि, अक्षरार्थः=व्यङ्ग्यार्थः, गृहीतः=अवगतः।

राजा—(सस्मितम्=समन्दहासम्) सकृत्=एकवारं, कृतः प्रणयः=रतिकेलिपरिचयः, यस्मिन्, सकृत्कृतप्रणयः, अयं=हंसवतीलक्षणो जनः, अथवा—कृतः प्रणयो येनास्याम् एवम्भूतः अयं जनः=अहमिति, इति=इत्थम्, अक्षरार्थः=अक्षरप्रतिपाद्यो गूढार्थः, तदहं=दुष्यन्तः, देवीं हंसवतीमन्तरेण=हंसवतीं विना, उपालम्भनं=यथोक्तं तिरस्कारम्, आगतोऽस्मि=प्राप्तोऽस्मि। सखे=मित्र माधव्य! मद्वचनात्=मदीयकथनं श्रुत्वा मत्सकाशात्, देवी हंसवती, उच्यताम्=कथ्यताम् (महाराज एवमाहेति), सम्यक्=सम्पूर्णं यथा स्यात्तथा, उपालब्धोऽस्मि=तिरस्कृतोऽस्मि।

राजा—अरे! कैसा अनुराग की धारा बहाने वाला गीत है।

विदूषक—मित्र! क्या आपने इस गीत का व्यङ्ग्यार्थ भी जान लिया?

राजा—(**मुस्कराकर**) इस व्यक्ति से मैंने केवल एक बार प्रेम किया है, यही इस गीत का अर्थ है और इसी से रानी हंसवती द्वारा मैं तिरस्कृत हुआ हूँ। मित्र माधव्य! तुम मेरी ओर से देवी हंसवती से कहो कि मैं तुम्हारे द्वारा भलीभाँति उपालम्भ का पात्र बना हूँ।

The king—What a beautiful song, advancing the affection.

Jester—Dear friend! have you understood or recognized the real meaning of this song?

The king—*(Smiling)* I loved this person only once, this much is the meaning of this song and by this only I am insulted by Haṁsavatī. Dear Mādhavya! you just tell her majesty Haṁsavatī on my behalf that by you I have indeed become a censurable one.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदूषकः—जं भवं आणवेदि। (उत्थाय) भो वअस्स! गहीदो तुए परकीएहिं हत्थेहिं सिहंडए अच्छभल्लो, ता वीदराअस्स असरणस्स णत्थि मे मोक्खो। **[यद्भवानाज्ञापयति। भो वयस्य! गृहीतस्त्वया परकीयाभ्यां हस्ताभ्यां शिखण्डके अच्छभल्लः। तद्वीतरागस्य अशरणस्य नास्ति मे मोक्षः।]**

राजा—सखे! गच्छ, नागरिकवृत्त्या सान्त्वयैनाम्।

विदूषकः—का गई? **[का गतिः ?]** (इति निष्क्रान्तः)

राजा—(स्वगतम्) किन्नु खलु गीतमेवविधमाकर्ण्य इष्टजनविरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि। अथवा—

विदूषकः—यद्=यथा, भवान्=त्वम्, आज्ञापयति=निर्दिशति। भो वयस्य=हे सखे! त्वया=भवता, (उत्थाय) परकीयाभ्याम्=अन्यदीयाभ्याम्, हस्ताभ्याम्=कराभ्याम्, शिखण्डके=शिखायाम् (शिखावच्छेदेनेत्यर्थः),अच्छभल्लः=भालूकः, गृहीतः=धृतः। तत्=तस्मात्, वीतरागस्य=विगतक्लेशादिकस्य, अथवा—त्यक्तजीवनानुरागस्य, अशरणस्य=निराश्रयस्य, मे=मम, मोक्षः=हंसवतीसकाशाद् मुक्तिः, नास्ति। (अच्छभालूकस्येव तदानीं हंसवत्या व्यवहारेण मम दुर्दशा सम्भवादिति।)

राजा—सखे! गच्छ=तस्याः पार्श्वे याहि, नागरिकवृत्त्या=विदग्धव्यवहारेण, एनां हंसवतीम्, सान्त्वय=प्रसादय, कोपान्निवर्तय।

विदूषकः—का गतिः=गमनं विना कः उपायः ? (इति=एवमुक्त्वा, निष्क्रान्तः=निर्गतः।)

राजा—(स्वगतम्=स्वमनसि) किन्नु इति वितर्के, खल्विति निश्चितम्, एवंविधं=उपालम्भपूर्णम् ईदृक्, गीतं=गानम्, आकर्ण्य=श्रुत्वा, इष्टजनस्य=प्रणयिजनस्य, विरहात्=विप्रयोगात्, ऋते=विनाऽपि, इष्टजनविरहादृतेऽपि, बलवत्=अत्यन्तम्, उत्कण्ठितः=व्याकुलितः, अस्मि। अथवा=यद्वा—

विदूषक—जैसी आपकी आज्ञा। **(उठकर)** आपने दूसरे के हाथों से भालू की चोटी पकड़ी है, इस स्थिति में जीवन से निराश मुझ गरीब का बचना कठिन है।

राजा—मित्र! उसे जाकर नागरिक-वृत्ति (शहरी ढंग) से समझाओ।

विदूषक—और गति ही क्या है? (अर्थात् जाना ही पड़ेगा) **(प्रस्थान)**

राजा—**(मन में)** इस प्रकार का गीत सुनकर किसी प्रिय के विरह से दुःखी न होते हुए भी मैं इस प्रकार उत्सुक क्यों हूँ? अथवा—

Jester—As your majesty command. Dear friend you have caught hold a bear by its lock hair (through other's hand), in this situation my survival appears very difficult.

King—Friend! Go, and console her in a civilized manner.

Jester—There is no other way. *(Exits)*

The King—*(To himself)* Hearing such a song though I am not at all anxious due to seperation of some affectionate one of mine, why I am striving so badly. Or—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रम्याणि वीक्ष्य मधुराँश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि॥ ९॥

(इत्यस्मृतिनिमित्तमुन्मनस्कत्वं रूपयति।)

कञ्चुकी—(उपसृत्य) जयति जयति देवः। एते खलु हिमगिरेरुपत्यकारण्यवासिनः कण्वसन्देशमादाय सस्त्रीकास्तपस्विनः सम्प्राप्ताः। श्रुत्वा देवः प्रमाणम्।

अन्वयः—सुखितोऽपि जन्तुः रम्याणि वीक्ष्य मधुरान् शब्दाँश्च निशम्य यत् पर्य्युत्सुकः भवति तत् नूनं चेतसा अबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि स्मरति॥ ९॥

रम्याणीति। सुखितोऽपि=विरहविरहितोऽपि, जन्तुः=प्राणी, रम्याणि=सुन्दराणि उद्यान-प्रमदादीनि, वीक्ष्य=अवलोक्य, मधुरान्=प्रियान् कर्णसुखदान्, शब्दाँश्च, निशम्य=श्रुत्वा, यत्=यस्मात्, पर्य्युत्सुकः=उत्कण्ठितः भवति, तत्=तस्मात्, नूनं=निश्चितमेव, चेतसा=मनसा करणेन, अबोधपूर्वम्=अबुद्धिपूर्वकम्, यथा स्यात्तथा, भावस्थिराणि=स्वभावादेवाक्षयाणि, जननान्तर-सौहृदानि=पूर्वजन्मानुभूतान् प्रणयादिसम्बन्धविशेषान्, स्मरति=स्वभावादनुध्यायति। अत्र विभावना अप्रस्तुतप्रशंसा नामालङ्कारौ। वसन्ततिलकं वृत्तम्॥ ९॥

भावार्थः—प्रस्तुतलोकोत्कण्ठाहेतुभूतप्रणयिजनविश्लेषदुःखाभावेऽपि जन्मान्तरीयप्रणय-स्मृतेरियमुत्कण्ठा जातेति भावः॥ ९॥

(इति=एवं, अस्मृतिः=उत्कण्ठाहेतोरस्मरणं, निमित्तं=हेतुः, यस्य तत् अस्मृतिनिमित्तम्, उन्मनस्कत्वम्=उत्कण्ठां, रूपयति=अभिनयति।)

कञ्चुकीयः—(उपसृत्य=अन्तिकं प्राप्य) जयति जयति देवः। एते=मत्पृष्ठानुगामिनः, खल्विति वितर्के, हिमगिरेः=हिमालयस्य, उपत्यकायाम्=आसन्नभूमौ, यदरण्यं तत्र वसन्तीति

सर्वथा सुखी प्राणी भी रमणीय वस्तु को देखकर अथवा मधुर शब्द को सुनकर जो उत्कण्ठित होता है, वह निश्चय ही जन्मान्तर के स्वाभाविक प्रेम का अनुभव अथवा स्मरण करता है॥ ९॥

(ऐसा कहकर राजा स्मरण करने की उन्मनस्कता का अभिनय करता है।)

कञ्चुकी—(**पास आकर**) महाराज की जय हो। हिमालय की तलहटी के वन में रहने वाले ये मुनि दो स्त्रियों के साथ महर्षि कण्व का कोई सन्देश लेकर आये हैं। मेरी प्रार्थना

A living being though completely happy, seeing an attractive thing or hearing a pleasant voice, when becomes anxious, really he memorise the real love (affection) of other life. (9)

(Saying so, acts a excited for not remembering)

Chamberlain—(Approaching) May your majesty be victorious. Here indeed, have arrived ascetics, accompanied by women, inhabiting the penance grove adjoining the Himālaya

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(सविस्मयम्) किं कण्वसन्देशहारिणः सस्त्रीकास्तपस्विनः ?

कञ्चुकी—अथ किम् ?

राजा—तेन हि विज्ञाप्यतां मद्वचनादुपाध्यायः सोमरातः, अमूनाश्रमवासिनः श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति। अहमप्येतांस्तपस्विदर्शनोचितप्रदेशे प्रतिपालयामि।

हिमगिरेरुपत्यकारण्यवासिनः, तपस्विनः=तापसाः, कण्वस्य=महर्षेः कण्वस्य, सन्देशम्=वाचिकम्, आदाय=गृहीत्वा, सस्त्रीकाः=स्त्रीभ्यां सहिताः, सम्प्राप्ताः=अत्रागताः, उपस्थिताः। श्रुत्वा=आकर्ण्य, देवः=भवान्, प्रमाणं=कर्त्तव्यनिश्चयकृत् भवतु।

राजा—(सविस्मयम्=साश्चर्यम्) किं कण्वसन्देशहारिणः=महर्षेः कण्वस्य वाचिकमादाय, सस्त्रीकाः=स्त्रीजनसहितास्तपस्विनः समागताः, किम् इति प्रश्ने।

कञ्चुकीयः—अथ किम्=एवमेव।

राजा—तेन हि=यद्येवं तर्हि, मद्वचनात्=मदीयनिदेशात्, उपाध्यायः=शिक्षकः, सोमरातः=तदाख्यः पुरोहितः (राज्ञोऽध्यापक एव तदानीं पुरोहित आसीदिति बोध्यम्), विज्ञाप्यताम्=कथ्यताम्, अमून्=समागतान्, आश्रमवासिनस्तपस्विनः, श्रौतेन=वेदोक्तेन, विधिना= विधानेन, सत्कृत्य= पूजयित्वा, स्वयमेव=आत्मनैव (न त्वन्यद्वारेण), प्रवेशयितुम्=अभ्यन्तरप्रवेष्टुम्, अर्हतीति। अहम्=दुष्यन्तोऽपि, एतान्=कण्वाश्रमवासिनस्तपस्विनः, तपस्विदर्शनोचितप्रदेशे=पावनस्थले, यज्ञशालायाम् इति यावत्, प्रतिपालयामि=प्रतीक्षे।

सुनकर महाराज अपने कर्तव्य का निश्चय करें। अर्थात् विचार करें कि उन्हें वह सुनना चाहिए या नहीं।

राजा— (**आश्चर्य के साथ**) क्या महर्षि कण्व का सन्देश लेकर कुछ ऋषि स्त्रियों के साथ यहाँ आये हैं ?

कञ्चुकी—जी हाँ महाराज (और क्या)।

राजा—यदि ऐसा है तो हमारी ओर से अध्यापक सोमरात से कहो कि वे इन ऋषियों का वैदिक पद्धति से स्वागत कर अपने साथ यहाँ (मेरे पास) लायें। मैं भी तपस्वियों से भेंट करने योग्य स्थान पर बैठकर उनकी प्रतीक्षा करता हूँ।

---

mountain, bringing with them a message from sage Kaṇva. Having heard, your majesty is the authority to decide what is to be done.

The King—(With surprise) What! ascetics accompanied by women, bringing a message from sage Kaṇva.

Chamberlain—What then.

The king—Then, indeed, let the preceptor, Somarata, be thus requested at my words (on my behaf). It bahoves you to introduce even by yourself these dwellers of the hermitage, after having honoured them according to the form enjoined by the Vedās. I also wait for them, staying in the place suited to the visit of hermits.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कञ्चुकी—यथाज्ञापयति देवः (इति निष्क्रान्तः)।

राजा—(उत्थाय) वेत्रवति! अग्निशरणमार्गमादेशय।

प्रतिहारी—इदो इदो एदु देवो। (परिक्रम्य) एसो अहिणवसम्मज्जणरमणीओ सण्णिहिदहोमधेणु अग्गिसरणालिंदोः; ता आरोहदु देवो। [**इत इत एतु देवः। एषः अभिनवसम्मार्ज्जनरमणीयः सन्निहितहोमधेनुः अग्निशरणालिन्दः, तदारोहतु देवः।**]

राजा—(आरुह्य परिजनांसावलम्बी तिष्ठन्) वेत्रवति! किमुद्दिश्य तत्रभवता कण्वेन मत्सकाशमृषयः प्रेषिताः ?

कञ्चुकीयः—यथा=येन प्रकारेण, आज्ञापयति=आज्ञां करोति, देवः=भवान्। (इति=इत्युक्त्वा, निष्क्रान्तः=निर्गतः।)

राजा—(उत्थाय आसनादिति शेषः) वेत्रवति! अग्निशरणमार्गम्=यज्ञशालामार्गम्, आदेशय=वचनेन प्रदर्शय।

प्रतीहारी—इत इतः अमुनानेन मार्गेण, एतु=आगच्छतु, देवः=भवान्। (परिक्रम्य) एषः=पुरतःस्थितः, अभिनवसम्मार्जनेन=सद्यःकृतपरिष्कृतिना, रमणीयः=शोभनः, अभिनवसम्मार्जनरमणीयः, सन्निहिता=समीपवर्त्तिनी, होमधेनुः=यज्ञीयसाधनसाधिका धेनुर्यत्र सः सन्निहितहोमधेनुः, अग्निशरणस्य=अग्निशालायाः, अलिन्दः=बहिर्द्वारप्रकोष्ठम्। तत्= तस्मात्, आरोहतु=निःश्रेणिमधिरोहतु, एनम्, देवः=भवान्।

राजा—(आरुह्य, परिजनस्य=कस्यचित् परिचारकजनस्य, अंसं=स्कन्धम्, अवलम्बते तच्छीलः परिजनांसावलम्बी=कस्यचित् सेवकस्य स्कन्धे करं धृत्वा, तिष्ठन्=उपविशन्) वेत्रवति=प्रतीहारी! किमुद्दिश्य=किमभिसन्धाय, तत्रभवता=पूज्येन, कण्वेन=महर्षिणा, मत्सकाशम्=मत्समीपम्, ऋषयः=तपस्विनः, प्रेषिताः=प्रेरिताः—

कञ्चुकी—जैसी महाराज की आज्ञा। **(चला जाता है)**

राजा—**(उठकर)** वेत्रवती! यज्ञशाला का मार्ग बताओ।

प्रतिहारी—इधर, इधर महाराज! **(चलकर)** यह अभी धोने से सुन्दर और पार्श्ववर्ती यज्ञीय धेनु से युक्त यज्ञशाला का बाहरी द्वार है, अतः आप ऊपर चढ़ें।

राजा—**(सेवक के कन्धे का सहारा लेकर ऊपर चढ़कर)** वेत्रवती! महर्षि कण्व ने किसलए मेरे पास ऋषि भेजे हैं ?

***Chamberlain*—**As your majesty commands. *(Exit)*

The king*—(Rising)* Vetravatī! show the way to the fire chamber.

***Door-keeper*—**This way, this way, may your majesty come. This is due to recent wash, very charming and accompanied by a cow suitable for yajña. This is its main-gate. So, you please mount or your majesty may mount here.

The king*—(Ascending, stands leaning on the shoulders of the attendent)* Vetravatī with what object may the ascetics have been sent to me by his holiness Kaṇva.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किन्तावद् व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितं?
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम्?।
आहोस्वित् प्रसवो ममापरिचितैर्विष्टम्भितो वीरुधा-
मित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः॥ १०॥

प्रतीहारी—देवस्स भुअदंडणिव्वुदे अस्समपदे कुदो एवं; किंतु सुचरिताहिणंदिणो इसीओ देवं सभाजइदुं आअदेत्ति तक्केमि। **[देवस्य भुजदण्डनिर्वृते आश्रमपदे कुत एवम्; किन्तु सुचरिताभिनन्दिन ऋषयः देवं सभाजयितुमागता इति तर्कयामि।]**

अन्वयः—विघ्नैः उपोढं तपसां व्रतिनां तपः किन्तावद् दूषितम्, उत केनचित् धर्मारण्यचरेषु प्राणिषु असत् चेष्टितम्, आहोस्वित् मम अपरिचितैः वीरुधां प्रसवः विष्टम्भितः इति आरूढ-बहुप्रतर्कम् मे मनः अपरिच्छेदाकुलं भवतीति शेषः॥ १०॥

किन्तावदिति। विघ्नैः=व्याघातैः राक्षसादिभिर्वा, उपोढं=धृतं, तपः=त्रिविधं कर्म्म, यैस्ते तेषाम् उपोढतपसाम्, व्रतिनाम्=याज्ञिकानाम्, तपः=यागादि, किं तावत्, दूषितम्=व्याहतम्। उत=अथवा, केनचित्=दुष्टेन, धर्मारण्यचरेषु=तपोवनविहारिषु, प्राणिषु=हरिणादिजीवेषु विषये, असत्=हिंसादि, चेष्टितम्=आचरितम्, आहोस्वित्=किं वा, मम अपरिचितैः=अजातमत्परिचयैः जनैः, वीरुधां=लतानां, प्रसवः=पुष्पं फलं वा, विष्टम्भितः=प्रतिबन्धं प्रापितः, इति=अनेन प्रकारेण, आरूढाः=उद्भूताः, बहवः=नानाविधाः, प्रतर्काः=संशयाः, यस्मिन् तत् आरूढबहुप्रतर्कम्, मे=मम, मनः=अन्तःकरणम्, अपरिच्छेदेन=एकतरानवधारणेन, आकुलं=व्याकुलं, अपरिच्छेदाकुलं भवतीति शेषः। अत्र पदार्थहेतुकं काव्यलिङ्गम्। शार्दूलविक्रीडितं वृत्तम्॥ १०॥

भावार्थः—राक्षसादिभिः उपोढतपसां याज्ञिकतापसानां तपः दूषितम्, अथवा केनचित् दुष्टेन तपोवनविहारिषु प्राणिषु विषये असदाचरितम्, किं वा ममापरिचितैः जनैः लतानां प्रसवः प्रतिबन्धं प्रापितः, इत्यादिकमनेकविधं चिन्तयन् मम मनः एकतरानवधारणेन तदवधारणार्थं विह्वलं भवति॥ १०॥

प्रतीहारी—देवस्य=भवतः, भुजदण्डेन=बाहुदण्डेन, निर्वृते=सुस्थीकृते, आश्रमपदे=

क्या उन तपस्वियों की तपस्या में किसी प्रकार की बाधा उपस्थित हो गई है अथवा धर्मारण्य में इच्छानुसार विचरण करने वाले प्राणियों के साथ किसी ने असद्व्यवहार किया है या किसी मेरे अपरिचित ने आश्रम की लताओं के फल-फूल आदि को नष्ट कर डाला है? इस प्रकार अनेकानेक तर्क-वितर्क मेरे मन में उठ रहे हैं, किन्तु कोई निर्णय न कर पा सकने के कारण मेरा मन व्याकुल हो रहा है॥ १०॥

प्रतिहारी—महाराज के भुजदण्ड से सुरक्षित उस तपोवन में इस प्रकार की बाधाएँ

It is indeed that the penance of those, who have taken a vow and have developed austerities, has been censured by obstacles? or has someone acted wickedly towards animals moving freely in the religious forest? or is the produce of creepers stopped owing to my misdeeds? by some unknown person to me? My mind, in which many doubts have thus arisen, is distressed owing to indecision.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(ततः प्रविशतः गौतमीसहितौ शकुन्तलामादाय कण्वशिष्यौ पुरतश्चैषां पुरोहितकञ्चुकिनौ।)

कञ्चुकी—इत इतो भवन्तः।

शार्ङ्गरवः—सखे! शारद्वत!

महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते।

तपोवनक्षेत्रे, एवम्=असदाचरणम्, कुतः=कस्मात् भवितुमर्हति? किन्तु सुचरितेन=भवतः सत्कार्येण, अभिनन्दन्ति=सन्तुष्यन्तीति ये ते सुचरिताभिनन्दिनः, ऋषयः=तापसाः, देवं=भवन्तम्, सभाजयितुम्= सम्मानयितुम्, आगताः=प्राप्ताः, इति=एवं, तर्कयामि=सम्भावयामि।

(ततः=तदनन्तरं, प्रविशतः=प्रवेशं कुरुतः, गौतमी=एतन्नाम्नी कण्वधर्मभगिनी, सहितौ, शकुन्तलामादाय=गृहीत्वा, कण्वशिष्यौ=शार्ङ्गरवशारद्वतौ, पुरतः=अग्रतश्च, एषां=कण्वशिष्यादीनाम्, पुरोहितः=दुष्यन्तकुलगुरुः, कञ्चुकी।

कञ्चुकी—इत इतो भवन्तः=अमुनानेन मार्गेण यूयम्।

शार्ङ्गरवः—सखे=मित्र शारद्वत!

अन्वयः—असौ महाभागः नरपतिः कामम् अभिन्नस्थितिः तथा—वर्णानां कश्चिदपकृष्टोऽपि अपथं न भजते। तथापि शश्वत् परिचितविविक्तेन मनसा इदं जनाकीर्णं गृहं हुतवहपरीतम् इव मन्ये॥ ११॥

महाभाग इति। असौ=पुरतःस्थितः, महान्=विपुलः, भागः=भागधेयं, यस्य सः महाभागः ('आरम्भोत्पत्तिमामृत्योः कलङ्को यस्य नो भवेत्। स्याच्चैवानुपमाकीर्त्तिर्महाभागः स उच्यते'॥),

---

उपस्थित ही कैसे हो सकती हैं। मुझे तो यही जान पड़ता है कि आपके सद्व्यवहार से सन्तुष्ट होकर ये आपका अभिनन्दन करने आये हैं।

(इसके बाद शकुन्तला को लेकर गौतमी सहित कण्व के शिष्यों का प्रवेश, इनके सामने पुरोहित और कञ्चुकी का आगमन।)

कञ्चुकी—आप लोग इधर से आइए।

शार्ङ्गरव—मित्र शारद्वत!

यह महाभाग्यवान् राजा कभी अपनी मर्यादा नहीं छोड़ता। इसके राज्य में रहने वाले चारों वर्णों के मनुष्यों में से कोई भी कुपथगामी नहीं होता (सदाचार का उल्लंघन नहीं करता)।

Door-keeper—I conjecture that pleased (your) good deeds, the sages have come to congratulate your majesty.

(Then enter sages, accompanied by Gautamī, leading Śakuntalā forward and the chamberlain and preceptor in thier front)

Chamberlain—This way, this way may your honours come.

Śarṅgrava—Śaradvata—

Granted that this glorious king swerves (remains away or deviate) from his duty, and due to this not one even though the

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथापीदं शश्वत्परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव ॥ ११ ॥

शारद्वतः—शार्ङ्गरव ! स्थाने खलु पुरप्रवेशात्तवेदृशः संवेगः । अहन्तु—

अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम् ।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि ॥ १२ ॥

नरपतिः=राजा दुष्यन्तः, कामं=सम्यक्, अभिन्ना=अव्याहता, स्थितिः=लोकमर्यादा, येन सः अभिन्नस्थितिः=अनुल्लङ्घिताचारपद्धतिः, तथा=एवम्, वर्णानाम्=ब्राह्मणक्षत्रियादीनाम्, कश्चिदपकृष्टोऽपि=जात्या कर्म्मणा वा पतितो निकृष्टो वाऽपि, अपथं=कुमार्गं, सदाचारलङ्घनादिकम्, न भजते=नैवाश्रयति, राजशासनादिति भावः। तथापि=राजप्रजयोरीदृक्शिष्टाचारे सत्यपि, शश्वत्=सर्वदा, परिचितम्=आजन्मसेवितं, विविक्तं=विजनस्थानं, येन तेन अपरिचितविविक्तेन, मनसा=चित्तेन, इदम्=एतत्, जनाकीर्णं=लोकसङ्कुलम्, गृहं=राजसदनं, हुतवहेन=वह्निना, परीतं= व्याप्तमिव, मन्ये=सम्भावयामि। अत्र च विभावनाविशेषोक्त्योः सन्देहसङ्करालङ्कारः। 'हुतवहपरीतं गृहमिव' इत्यंशे उपमा। शिखरिणी नाम वृत्तम् ॥ ११ ॥

भावार्थः—असौ महाभागः राजा दुष्यन्तः कदापि स्वकीयां मर्यादां न त्यजति। तथा अस्य शासने ब्राह्मणक्षत्रियादीनां मध्ये कश्चिद् जात्या कर्म्मणा वा निकृष्टोऽपि सदाचारलङ्घनादिकं न करोति। तथापि सततारण्यनिवासत्वात् जनाकुलम् इदं नगरं राजसदनं वा वह्निना व्याप्तमिव मन्ये ॥ ११ ॥

शारद्वतः—शार्ङ्गरव! स्थाने=युक्तम्, पुरप्रवेशात्=नगरप्रवेशात्, तव=भवतः, ईदृशः संवेगः=उद्वेगः (खल्विति वितर्के) (तथा च चित्तं परिचयविवशमिति तवैवं प्रतीतिर्युक्तैव ममापि तथैवोदयात् इति भावः)। अहन्तु=अहं पुनः—

अन्वयः—स्नातः अहम् इह सुखसङ्गिनम् अभ्यक्तम् इव अवैमि। तथा शुचिः इह सुखसङ्गिनम् अशुचिम् इव अवैमि। तथा प्रबुद्धः अहम् इह सुखसङ्गिनम् जनं सुप्तमिव अवैमि। तथा स्वैरगतिः जनम् इह सुखसङ्गिनं बद्धमिव अवैमि ॥ १२ ॥

फिर भी चिरकाल तक एकान्तवास के अभ्यस्त होने के कारण मैं इस जनाकुल नगर (महल) को अग्नि से घिरे हुए घर की भाँति मानता हूँ ॥ ११ ॥

शारद्वत—शार्ङ्गरव! राजभवन में (राजधानी में) प्रविष्ट होकर तुम्हारा इस प्रकार उद्विग्न होना उचित ही है, किन्तु मैं तो—

मैं यहाँ के व्यक्तियों को उसी प्रकार समझता हूँ जैसे स्नान किया हुआ व्यक्ति तेल

---

lowest, among the four main classes, resorts to the wrong path never the less with my mind perpetually accustomed to solitude I regard this place swarmed with men as a house enveloped (surrounded) in fire. (11)

Śardvata—Śarṅgarva! Rightly have you become thus sice entering the city. I also—

Regard the people here, who are addicted to pleasure, as one

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरोधाः—अत एव भवद्विधा महान्तः।

शकुन्तला—(दुर्निमित्तमभिनीय) अम्मो! किं मे वामेदरं णअणं विप्फुरदि? [**अहो! किं मे वामेतरत् नयनं विस्फुरति?**

गौतमी—जादे! पडिहदं, अमंगलं, सुहाइं दे होंतु। [**जाते! प्रतिहतममङ्गलम्, सुखानि ते भवन्तु।**] (इति परिक्रामन्ति)

अभ्यक्तमिति। स्नातः=कृतस्नानः, अहम्, इह=राजधान्याम्, सुखसङ्गिनं=कृतस्नानतयैव प्राप्तपावित्र्यसुखं जनम्, अभ्यक्तं=तैलाक्तदेहमिव, अवैमि=अवगच्छामि। तथा शुचिः=पवित्रोऽहम्, इह=राजधान्याम्, सुखसङ्गिनं=भगवत्स्मरणादिना एव पावित्र्यवन्तं जनम्, अशुचिम्=अपवित्रमिव अवैमि। तथा प्रबुद्धः=जागृतोऽहम्, इह=राजधान्याम्, सुखसङ्गिनम्=उपभुज्यमानजागरणावस्थोपस्थितसुखं जनं, सुप्तम्=निद्रितमिव, अवैमि। तथा स्वैरा=स्वाधीना, गतिर्यस्य सः स्वैरगतिः, अहम्, इह=राजधान्याम्, सुखसङ्गिनम्=निर्भुक्ततयावस्थानात्सुखभोगिनं जनम्, बद्धमिव=निगडितमिव, अवैमि। अत्रोपमालङ्कारः। आर्य्या जातिः॥ १२॥

भावार्थः—अत्रागत्य तु कृतस्नानः अहं कृतस्नानतयैव प्राप्तपावित्र्यसुखं जनं तैलाक्तदेहमिव अवैमि। तथा पवित्रोऽहं भगवत्स्मरणादिना पावित्र्यवन्तं जनम् अपवित्रमिव अवैमि। प्रबुद्धोऽहम् उपभुज्यमानजागरणावस्थोपस्थितसुखं जनं सुप्तमिव अवैमि तथा स्वैरगतिः अहम् इह सुखसङ्गिनं जनं बद्धमिव अवैमि। हस्तपादादिभिरपि दुष्कार्य्यस्य बाधाप्रदानस्याकरिष्यमाणत्वादिति भावः॥ १२॥

पुरोधाः—अत एव=शिथिलीकृतसांसारिकसुखत्वादेव, भवद्विधाः=भवादृशा मुनयः, महान्तः=लोकोत्तराः।

शकुन्तला—(दुर्निमित्तम्=दुर्लक्षणम्, अभिनीय=रूपयित्वा) अहो इत्युद्वेगे, किं=कथम्, मे=मम, वामेतरं=दक्षिणं, नयनं=नेत्रम्, विस्फुरति=स्पन्दते?

लगाये हुए व्यक्ति को, पवित्र अपवित्र को, जागता हुआ सोते हुए को और स्वतन्त्र परतन्त्र को देखता है।

पुरोधा—इसीलिए आप लोग महान् हैं।

शकुन्तला—(अपशकुन का अभिनय करके) अरे! न जाने क्यों मेरा दक्षिण नेत्र फड़क रहा है।

गौतमी—पुत्री! तुम्हारा अमङ्गल नष्ट हो। तुम्हें सब प्रकार का सुख मिले। **(यह कहकर वे घूमती हैं)**

---

who has had his bath regards the anoited, as one who is pure the impure, as one who is awake the sleeping, as one whose movements are free the bound. (12)

Preceptor—That's why you are considered as great ones.

Śakuntalā—*(Acting as if she had seen bad omen)* I do not know why my right eye fluttering?

Gautamī—Child! The misfortune struck back or driven

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरोधाः—(राजानं निर्दिश्य) भो भोस्तपस्विनः! असावत्रभवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनः प्रतिपालयति वः, पश्यतैनम्।

शार्ङ्गरवः—भो महात्मन्! काममेतदभिनन्दनीयम्; तथापि वयमत्र मध्यस्थाः।

भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्॥ १३॥

गौतमी—जाते=वत्से! प्रतिहतम्=विध्वस्तम्, अमङ्गलम्=अनिष्टं अशुभम्, ते=तव, सुखानि=मङ्गलानि, भवन्तु। (इति=इत्युक्त्वा, परिक्रामन्ति=पादक्षेपं कुर्वन्ति।)

पुरोधाः—(राजानं=दुष्यन्तं, निर्दिश्य=अङ्गुल्या निर्देशं कृत्वा, भो भोस्तपस्विनः! सम्भ्रमे द्विरुक्तिः, तपस्विनः=तापसाः! असौ=पुरतः स्थितः, अत्रभवान्=सर्वमान्यः, वर्णाश्रमाणाम्=ब्राह्मणक्षत्रियादीनां तथा च ब्रह्मचर्यगार्हस्थ्यादीनाम्, रक्षिता=पालयिता, प्रागेव=भवदत्रागमनात् पूर्वमेव, मुक्तमासनं येन सः मुक्तासनः=आसनं परित्यज्य, वः=युष्मान्, प्रतिपालयति=प्रतीक्षते। एनं=राजानं, पश्यत=अवलोकयत।

शार्ङ्गरवः—भो महात्मन्=महानुभाव! एतत्=राज्ञः पूर्वोक्तमाचरणम्, कामं=पर्याप्तमेव, अभिनन्दनीयम्=प्रशंसाविषयीभूतम् (स्तुत्यम्), तथापि=पर्याप्तप्रशंसार्हत्वेऽपि, अत्र=एतस्मिन् अभिनन्दनविषये, वयम्=कण्वशिष्याः (तापसाः), मध्यस्थाः=तटस्थाः।

अन्वयः—तरवः फलोद्गमैः नम्राः भवन्ति, घनाः नवाम्बुभिः दूरविलम्बिनः भवन्ति, सत्पुरुषाः समृद्धिभिः अनुद्धताः भवन्ति। एषः परोपकारिणां स्वभाव एव॥ १३॥

भवन्तीति। तरवः=पादपाः, फलानाम् उद्गमैः=उत्पत्तिभिः, नम्राः=तत्फलभरेण विनताः भवन्ति, घनाः=मेघाः, नवाम्बुभिः=नवजलसञ्चयैः, दूराद् विलम्बन्ते इति दूरविलम्बिनः=भूमि-निकटवर्तिनो भवन्ति, तथा सन्तः=साधवः, च ते पुरुषाश्चेति सत्पुरुषाः=सज्जनाः, समृद्धिभिः=

पुरोधा—(**राजा की ओर सङ्केत करके**) ओ तपस्वियो! वर्ण और आश्रम के रक्षक हमारे माननीय महाराज आप लोगों के आने से पूर्व ही आसन से उठकर आप लोगों की प्रतीक्षा कर रहे हैं। इनके दर्शन कीजिए।

शार्ङ्गरव—ओ महात्मा! महाराज का यह व्यवहार अभिनन्दनीय है परन्तु हम तो इस विषय में उदासीन हैं। क्योंकि—

फल लग जाने पर वृक्ष झुक जाते हैं, नवीन जल भर लेने पर मेघ भूमि की ओर

---

away. You may receive all kinds of happiness or pleasures. *(They walk round)*

Purodhā—O, ascetics! here his majesty! the protector of all the four classes and the orders, is waiting you, having risen from his seat even before your arrival. Behold him.

O, Great one! true, this is commendable, yet we are indifferent in this matter. Why—

Trees become bent on account of the rising fruit, clouds hang a long way down owing to fresh waters; good men become

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिहारी—देव! पसण्णमुहा इसीओ दीसंति। [**देव! प्रसन्नमुखा ऋषयो दृश्यन्ते।**]

राजा—(शकुन्तलां निर्वर्ण्य) अये! अत्र—

केयमवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम्॥ १४॥

धनसम्पत्तिभिः, अनुद्धताः=गर्वशून्याः भवन्ति। एषः=नम्रत्वम्, परोपकारिणाम्=परोपकारदत्तमनसां, स्वभावः=प्रकृतिः, एव। अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः किञ्च अप्रस्तुतात् प्रस्तुतस्य प्रतीतेरप्रस्तुतप्रशंसापि तथा च क्रियारूपकधर्माभिसम्बन्धात् तुल्ययोगितापि। वंशस्थविलं वृत्तञ्च॥ १३॥

भावार्थः—फलवन्तो वृक्षाः, जलपूर्णाः मेघाः, ऐश्वर्यशालिनः साधवः परोपकारनिरताश्च जनाः सर्वदा नम्रा एव भवन्तीति तेषां नैसर्गिकस्वभाव एव इति भावः॥ १३॥

प्रतीहारी—देव=स्वामिन्! प्रसन्नानि मुखानि येषान्ते प्रसन्नमुखाः, ऋषयः=तापसाः, दृश्यन्ते=प्रतीयन्ते।

राजा—(शकुन्तलां=कण्वदुहितां, निर्वर्ण्य=विशेषेणावलोक्य) अये=इति सम्भ्रमे, अत्र= स्थानेऽस्मिन्, ममाग्रे इत्यर्थः।

अन्वयः—पाण्डुपत्राणां मध्ये किसलयम् इव तपोधनानां मध्ये नातिपरिस्फुटशरीरलावण्या इयम् अवगुण्ठनवती का?॥ १४॥

केयमिति। पाण्डूनि=परिणततया पाण्डुरवर्णानि, यानि पत्राणि तेषां पाण्डुपत्राणाम्= पीताभपत्राणां मध्ये, किसलयमिव=नवपल्लवमिव, तपोधनानां=तापसानां मध्ये, नातिपरिस्फुटम्= अनतिव्यक्तम् (गात्रस्थावरणात्), शरीरस्य लावण्यं=सौन्दर्यं, यस्याः सा नातिपरिस्फुटशरीर-लावण्या, इयम्=मत्पुरःस्थिता, अवगुण्ठनवती=शिरःप्रच्छादनवती, का=इयं पुरो विलसन्ती नारी का? अत्र श्रौतोपमालङ्कारः, वाक्यार्थहेतुकं काव्यलिङ्गमपि। आर्या जातिः॥ १४॥

लटक (झुक) जाते हैं; इसी प्रकार सत्पुरुष समृद्धि पाकर नम्र हो जाते हैं। वस्तुतः परोपकारियों का स्वभाव ही ऐसा होता है॥ १३॥

प्रतिहारी—देव! ऋषि प्रसन्नमुख जान पड़ते हैं।

राजा—(**देखकर**) अरे यहाँ—

पीले पत्तों के मध्य लाल-लाल किसलय की भाँति जिसका शारीरिक सौन्दर्य अभी पूर्णतः प्रस्फुटित नहीं हुआ है ऐसी कौन यह घूंघट वाली नारी ऋषियों के मध्य स्थित है॥ १४॥

---

the reverse of arrogant by riches, this is the very natural of the benefactors of others. (13)

Door-keeper—Your majesty! the sages appear to have cheerful complexions.

The king—*(Observing Śakuntalā)*

Who could she be, possessed of a veil and with the loveliness of her body not fully manifested, (remaining) among the ascetics like a tender sprout among pale leaves? (14)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतीहारी—भट्टा! कुदूहलगब्भो पडिहदो ण मे तक्को पसरदि। दंसणीआ उण से आकिदी लक्खीअदि। [**भर्त्तः! कुतूहलगर्भः प्रतिहतो न मे तर्कः प्रसरति। दर्शनीया पुनरस्या आकृतिर्लक्ष्यते।**]

राजा—भवतु, अनिर्वर्ण्यं खलु परकलत्रम्।

शकुन्तला—(उरसि हस्तं दत्त्वा स्वगतम्) हिअअ! किं एव्वं वेवसि? अज्जउत्तस्स तादिसभावाणुबंधं सुमरिअ धीरत्तणं दाव अवलंबस्स। [**हृदय! किमेवं वेपसे? आर्यपुत्रस्य तादृशभावानुबन्धं स्मृत्वा धीरत्वं तावदवलम्बस्व।**]

पुरोधाः—(पुरो गत्वा) स्वस्ति देवाय। देव! एते खलु विधिवदर्चितास्तपस्विनः; कश्चिदेतेषु उपाध्यायसन्देशोऽस्ति, तं देवः श्रोतुमर्हति।

भावार्थः—यथा पाण्डुपत्राणां मध्ये रक्ताभं किसलयं पृथगेव प्रतिभाति तथैव तापसानां मध्ये अविकसितशरीरलावण्या शिरःप्रच्छादनवती (अवगुण्ठनवती) इयं पुरो विलसन्ती नारी काऽस्ति?

प्रतिहारी—भर्त्तः=स्वामिन्! कुतूहलम्=आश्चर्यं, गर्भे यस्य सः कुतूहलगर्भः=दर्शनीयाकृतिर्वनितेत्याश्चर्यम्, इति, मे=मम, तर्कः=विचारः, केयं भवितुमर्हतीत्यूहः, प्रतिहतः=कुतूहलोपहितः सन्, न प्रसरति=न प्रसारमाप्नोति। पुनः=किन्तु, दर्शनीया=दर्शनयोग्या, अस्याः=ललनायाः, आकृतिः=स्वरूपः, लक्ष्यते=दृश्यते।

राजा—भवतु=इयं या वा का वा भवत्वित्यर्थः, परकलत्रं=परभार्य्याम्, अनिर्वर्ण्यम्=अनवलोकनीयम्, खल्विति निश्चितम्।

शकुन्तला—(उरसि=वक्षसि, हस्तं निधाय=धृत्वा) हृदय! एवम्=अनेन प्रकारेण, किं वेपसे=कथं कम्पसे? आर्यपुत्रस्य=भर्त्तुः, तादृशभावानुबन्धं=पूर्वानुभूतानुरागप्रवाहं, स्मृत्वा=स्मरणपथमानीय, धीरत्वं=धैर्यम्, तावद् अवलम्बस्व=आश्रय। धीरं तावद् भव इति भावः।

पुरोधाः—(पुरः=अग्रे, गत्वा=प्राप्य) देवाय=भवते, स्वस्ति=मङ्गलमस्तु, एते=

प्रतिहारी—महाराज! कुतूहलवश—इससे जानने की इच्छा होते हुए भी मेरी तर्क-शक्ति आगे नहीं बढ़ती, तथापि इसकी आकृति दर्शनीय-सी प्रतीत होती है।

राजा—होने दो, परायी स्त्री को देखना उचित नहीं।

शकुन्तला—(**हृदय पर हाथ रखकर**) हृदय! तुम इस प्रकार काँप क्यों रहे हो? महाराज के इस अटूट प्रेम का स्मरण कर थोड़ा धैर्य धारण करो।

पुरोहित—(**आगे बढ़कर**) महाराज का कल्याण हो। ये विधिवत् पूजित तपस्वी हैं। इनके पास इनके गुरु का कोई सन्देश है; उसे आप सुन लीजिए।

Door-keeper—Your majesty! my conjecture, pregnant with curiosity, does not work. But her form indeed appears lovely.

King—Let it be. The wife of another ought not to be eyed.

Śakuntalā—*(Placing her hand on her heart to herself)* My heart! why do you thus tremble? Considering the affection of my husband, just be patient.

Preceptor—Here are the ascetics, worshipped according to

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—अवहितोऽस्मि।

शिष्यौ—(हस्तमुद्यम्य) भो राजन्! विजयतां भवान्।

राजा—सर्वानभिवादये वः।

शिष्यौ—स्वस्ति देवाय।

राजा—अपि निर्विघ्नं तपः?

शिष्यौ— **कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि।**
तपस्तपति घर्मांशौ कथमाविर्भविष्यति॥ १५॥

पुरोवर्त्तिनः, खल्विति निश्चयेन, विधिवद्=यथाविधि, अर्चिताः=पूजिताः, तपस्विनः=तापसाः, एतेषु=तपस्विषु, कश्चित्, उपाध्यायस्य=अध्यापकस्य कण्वस्य, सन्देशः=संवादः, अस्ति=विद्यते, तम्=सन्देशम्, देवः=भवान्, श्रोतुम्=आकर्णयितुम् अर्हति।

राजा—अवहितोऽस्मि=दत्तावधानोऽस्मि।

शिष्यौ—(हस्तमुद्यम्य=करमुत्तोल्य) भो राजन्! भवान्=त्वम्, विजयताम्=जयस्व।

राजा—वः=युष्मान् सर्वान्, अभिवादये=नमस्करोमि।

शिष्यौ—देवाय=भवते, स्वस्ति=मङ्गलमस्तु।

राजा—अपि=इति प्रश्ने, निर्विघ्नं तपः=युष्माकं तपः निर्विघ्नेन सम्पद्यते नु?

शिष्यौ—अन्वयः—त्वयि रक्षितरि सति सतां धर्मक्रियाविघ्नः कुतः? घर्मांशौ तपति सति तमः कथम् आविर्भविष्यति?॥ १५॥

कुत इति। त्वयि=दुष्यन्ते, रक्षितरि=परिपालयितरि सति, सतां=साधूनाम्, धर्मक्रियाणां=यागादिधर्मानुष्ठानां, विघ्नः=व्याघातः, कुतः=न कुतोऽपीत्यर्थः। घर्माः=उष्णाः, अंशवः=किरणाः,

---

राजा—मैं सुनने के लिए प्रस्तुत हूँ।

शिष्य—(हाथ उठाकर) महाराज! आपकी विजय हो।

राजा—मैं आप सबको प्रणाम करता हूँ।

शिष्य—आपका मंगल हो।

राजा—आपका तप निर्विघ्न हो रहा है।

शिष्य—आप जैसे रक्षक की विद्यमानता में भला हमारे तप में विघ्न कैसे आ सकता

---

the form. There is some message from their preceptor. It behoves your majesty to listen to it.

The king—I am ready to listen.

Pupils—(Raising up their hands) Be victorious, O' king.

The king—I salute you all.

Pupil—Be auspicious to you.

The king—Have the sages their penance free from obstacles?

Pupils—How can there be an obstacle to the religious

CC-0, Nepal Sanskrit Academy, Kathmandu Collection

राजा—(आत्मगतम्) सर्वथा अर्थवान् खलु मे राजशब्दः। (प्रकाशम्) तत्रभवान् कुशली कण्वः ?

शार्ङ्गरवः—राजन्! स्वाधीनकुशलाः सिद्धिमन्तः। स भवन्तमनामयप्रश्नपूर्वकमिदमाह।

राजा—किमाज्ञापयति भगवान्?

यस्य तस्मिन् घर्मांशौ=सूर्ये, तपति=जगत् सन्तापयति सति, तमः=तिमिरम्, कथम्=केन प्रकारेण, आविर्भविष्यति=प्रसरिष्यति। अत्र दृष्टान्तोऽलङ्कारः, पथ्यावक्त्रं वृत्तम्॥ १५॥

भावार्थः—राज्येऽस्मिन् त्वयि रक्षितरि सति सर्वे एव सन्तः तेषां च क्रियामात्रविघ्नोऽपि न सम्भाव्यते सुतरां धर्मक्रियाणामपि विघ्नाभाव एव॥ १५॥

राजा—(आत्मगतम्=स्वमनसि) मे=मम, राजशब्दः=राजेत्यानुपूर्वीवर्णस्तोमः, सर्वथा=सर्वात्मना, अर्थवान्=सार्थकः, खल्विति निश्चयेन। (प्रकाशम्) तत्रभवान्=पूजनीयः, कण्वः=महर्षिः, कुशली=मङ्गलवान् (मम पालनपद्धत्या सन्तुष्टाः सत्यः प्रकृतयो मामेवं स्तुवन्ति अतोऽहं धन्य (एवेत्याशयः)।

शार्ङ्गरवः—राजन्! सिद्धिमन्तः=सिद्धिसम्पन्नाः पुरुषाः, स्वाधीनम्=आत्मायत्तं, कुशलं=मङ्गलं, येषान्ते स्वाधीनकुशलाः (महर्षेः कण्वस्य सिद्धिमत्त्वात् स्वाधीनकुशलत्वमेवेति भावः)। सः=कण्वः, भवन्तम्=त्वम्, अनामयं=रोगविरहितं त्वं, प्रश्नपूर्वकम् अनामयप्रश्नपूर्वकम्=किमारोग्यमस्तीति आराज्ञ जिज्ञासापूर्वकम्, इदं=वक्ष्यमाणम्, आह=उक्तवान्—

'ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च'॥

राजा—भगवान् कण्वः किमाज्ञापयति=महर्षेः कः निदेशः ?

है ? जैसे सूर्य की विद्यमानता में अन्धकार का प्रसार सम्भव नहीं (वैसे ही आपके रहते विघ्न की आशङ्का नहीं हो सकती)॥ १५॥

राजा—(**मन में**) हमारे लिए राजा शब्द सर्वथा सार्थक है। (**प्रगट**) माननीय महर्षि कण्व सकुशल तो हैं।

शार्ङ्गरव—राजन्! सिद्धिसम्पन्न पुरुषों की कुशलता उनके अपनी अधीन होती है। उन्होंने आपके आरोग्य को पूछते हुए कहा है—

राजा—भगवान् कण्व क्या आज्ञा देते हैं ?

---

practices of the good men (saints), when you are the protector? How can darkness spread when the sun shines? (15)

The king—*(To himself)* My title 'Rājan' has indeed become significant. *(Aloud)* Is his holiness Kaṇva doing well?

Śārṅgarava—Persons of supernatural powers have their well being in their own control. He, with the previous enquiry regarding your health, says this to you—

The king—What does his holiness command?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शार्ङ्गरवः—यन्मिथः समयादिमां मदीयां दुहितरं भवानुपयेमे; तन्मया प्रीतिमता युवयोरनुज्ञातम्। कुतः—

त्वमर्हतामग्रसरः स्मृतोऽसि नः शकुन्तला मूर्तिमतीव सत्क्रिया।
समानयंस्तुल्यगुणं वधूवरं चिरस्य वाच्यं न गतः प्रजापतिः॥ १६॥

तदिदानीमापन्नसत्त्वेयं गृह्यतां सहधर्मचरणायेति।

शार्ङ्गरवः—यत्, मिथः=रहसि, इमां=पुरोवर्त्तिनीम्, मदीयाम्=मत्सम्बन्धिनीं, दुहितरं=पुत्रीम्, उपयेमे=परिणीतवान्, तत् कर्म, मया=कण्वेन, प्रीतिमता=परस्परानुरूपत्वात् सन्तुष्टेन, युवयोः=युवयोर्विषये, अनुज्ञातम्=अनुमतम्। कुतः—

अन्वयः—त्वम् अर्हताम् अग्रसरः नः स्मृतः असि। तथा शकुन्तला मूर्त्तिमती सत्क्रिया एव, अतः तुल्यगुणं वधूवरं समानयन् प्रजापतिः चिरस्य वाच्यं न गतः॥ १६॥

त्वमिति। त्वम्=भवान्, अर्हताम्=प्रशंसापात्राणां जनानाम्, अग्रसरः=अग्रगण्यः, नः=अस्माकम्, स्मृतः=अभिमतः, असि। तथा शकुन्तला=मद्दुहिता, मूर्त्तिमती=शरीरधारिणी, सत्क्रिया=सत्कारभूता एव। अतः, तुल्याः=अन्यूनातिरिक्ताः, गुणाः यस्य तत् तुल्यगुणं=समानगुणशालिनम्, वधूश्च वरश्चानयोः समाहारः वधूवरम्=दम्पतीयुगलम्, समानयन्=एकीकुर्वन्, विवाहविधिना संयोजयन्, प्रजापतिः=विधाता, चिरस्य=चिरादारभ्य प्रवृत्तम्, वाच्यम्=निन्दाम्, न गतः=न प्राप्तः। अत्र समालङ्कारः काव्यलिङ्गमपि च। वंशस्थविलं वृत्तम्॥ १६॥

भावार्थः—समानगुणशालित्वेनं परस्परानुरूपत्वात्, तथा च लोके—चिरकालप्रवृत्त-मयोग्ययुगित्यपवादमसहमान इव प्रजापतिरिमां त्वाञ्च तुल्यगुणं वधूवरं निर्माय संयोजयंश्चेदानीं ममार्जेति भावः। एतेनेतः पूर्वमेवं गुणोपेतं वधूवरं नाभूदिति भावः॥ १६॥

शार्ङ्गरव—आपने जो एकान्त में (गान्धर्व विधि से) मेरी कन्या से विवाह किया है, उसके लिए हम आप दोनों पर प्रसन्न हैं और आपके इस कार्य का अनुमोदन करते हैं। क्योंकि—

हमारा विश्वास है कि आप प्रशंसनीय लोगों में अग्रगण्य हैं और हमारी पुत्री शकुन्तला मूर्तिमती सत्क्रिया ही है। आप दोनों समान गुणवालों का संयोग कराकर ब्रह्मा भी बहुत दिनों तक के लिए निन्दित होने से बच गये हैं॥ १६॥

अब यह गर्भवती है, अतः आप अपना धर्मकार्य सम्पादन करने के लिए इसे ग्रहण करें।

***Śārṅgarava*—**That by mutual agreement you married this daughter of mine, that (your action) has been approved of by me; who love you both. Why—

You are known to us as the supreme of the worthy, and Śakuntalā is good action incarnate. Bringing togather a bride and a bride-groom of equal qualities, Brahmā, has, after a long time, not incurred censure. (16)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गौतमी—भद्दमुह ! किंपि वत्तुकामम्हि, ण मे वअणावसरो अत्थि ।[**भद्रमुख! किमपि वक्तुकामास्मि, न मे वचनावसरोऽस्ति।**]

राजा—आर्ये ! कथ्यताम् ।

गौतमी—

णावेक्खिदो गुरुअणो इमिए ण तुए वि पुच्छिदो बंधू।
एक्कक्कस्स अ चरिए भणादु किं एक्क एक्कस्सिं॥ १७॥
[नापेक्षितो गुरुजनः अनया न त्वयापि पृष्टो बन्धुः।
एकैकस्य च चरिते भणतु किमेक एकस्मिन्॥ १७॥]

तत्=तस्मात् त्वया परिणयस्य कृतत्वात्, इदानीम्, आपन्नं=जठरे प्राप्तम्, सत्त्वं=जन्तुः, यया सा आपन्नसत्त्वा=गर्भिणी, इयं=शकुन्तला, सहधर्माचरणाय=मिलित्वा यज्ञादिसम्पादनाय, गृह्यताम्=स्वीक्रियताम्।

गौतमी—भद्रमुख—भद्राणां=सज्जनानां, मुखः=मुखवदग्रगण्यः, तत्सम्बुद्धौ हे भद्रमुख= सज्जनशिरोमणि ! किमपि=किञ्चित्, वक्तुं कामो यस्याः सा वक्तुकामाऽस्मि, न मे वचनावसरोऽस्ति= न मत्कृते कथनावकाशोऽस्ति।

राजा—आर्ये=पूज्ये ! कथ्यताम्=उच्यताम्।

गौतमी—अन्वयः—अनया गुरुजनः नापेक्षितः त्वयापि बन्धुः न पृष्टः, अत एव एकैकस्य एकस्मिन् चरिते एकः किं भणतु॥ १७॥

नापेक्षित इति। अनया=शकुन्तलया, गुरुजनः=पित्रादिज्येष्ठजनः, नापेक्षितः=दुष्यन्तायात्मसमर्पणसम्बन्धेऽननुज्ञापितः, त्वयापि=दुष्यन्तेनापि, बन्धुः=अस्याः स्वस्य वा स्वजनः, न पृष्टः=अस्याः पाणिग्रहणं कर्तुं न जिज्ञासितः। अत एव एकैकस्य=परस्परस्य शकुन्तलायाः तव

गौतमी—भद्रमुख ! मैं भी कुछ कहना चाहती हूँ, परन्तु मुझे कहने का अवसर ही नहीं मिल रहा है।

राजा—आर्ये ! आप कहिए।

गौतमी—न इसने अपने गुरुजनों की अपेक्षा की और न आपने ही अपने बन्धुओं से कुछ पूछा, अतः आप दोनों का कार्य एक ही प्रकार का हुआ है; फिर इस विषय में दूसरा कोई क्या कह सकता है ?॥ १७॥

Now, this is pragnent therefore accept her for the joint discharge of religious duties.

Gautamī—O, the head of the gentlemen! I am desirous of saying something but I am not geting any chance to say.

The king—Honourable lady! please say *(what ever you like to say).*

Her elders were not regarded by her, nor were her (or your own) kinsmen consulted by you too. In a matter done singly by each, waht should another say to either? (17)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(आत्मगतम्) किण्णु क्खु अज्जउत्तो भणिस्सदि? **[किन्नु खलु आर्यपुत्रो भणिष्यति?]**

, **राजा**—(साशङ्कमाकर्ण्य) अये! किमिदमुपन्यस्तम्?

शकुन्तला—(आत्मगतम्) हद्दी हद्दी! सावलेवो से वअणावक्खेवो। **[हा धिक् हा धिक्! सावलेपोऽस्य वचनावक्षेपः।]**

शार्ङ्गरवः—किं नाम, किमिदमुपन्यस्तमिति? ननु भवन्त एव सुतरां लोकवृत्तान्त-निष्णाताः?

चेत्यर्थः, एकस्मिन्=गुरुजनानपेक्षणरूपाभिन्नात्मके, चरिते=अनुष्ठिते विषये, एकः=अन्यो जनः, किं भणतु=किं कथयतु (त्वं तां गृहाण सा च त्वां गृह्णातु इति किं कथयतु)। अत्र अर्थापत्तिरलङ्कारः। गाथेयम्॥ १७॥

भावार्थः—पूर्वं यथा परस्परानुरागवशात् बन्धुजनाननपेक्ष्यैव युवां परस्परं वव्राथे तथैवानुरागपूर्वकं परस्परं ग्रहीष्यथ इत्यत्र नास्माकमनुरोधापेक्षेति भावः॥ १७॥

शकुन्तला—(आत्मगतम्=स्वमनसि) किन्नु=न जाने किं, खल्विति वितर्के, आर्यपुत्रः= स्वामी, भणिष्यति=कथयिष्यति?

राजा—(आशङ्काया सहेति साशङ्कम्, आकर्ण्य=श्रुत्वा) अये इति सम्भ्रमे, किमिदं= शकुन्तलापरिणयरूपं वचनम्, उपन्यस्तं=वक्तुमारब्धम्।

शकुन्तला—(आत्मगतम्) हा धिग् हा धिगिति विषादे, तस्यातिशये द्विवचनम्। अस्य= राज्ञः, वचनावक्षेपः=वाग्विन्यासः, सावलेपः=सगर्वः)

(यदा राजा कथयति अस्योपन्यस्तस्यासम्बद्धत्वादर्थो नावबुध्यते तदाऽऽशङ्किता शकुन्तला कथयति यत् अस्य उक्तिः न सामान्या अपितु गर्वयुक्ता एव।)

शार्ङ्गरवः—किं=कथम्, नाम=सम्भवति (नामेति सम्भावनायाम्), अस्मदुच्चरितं

शकुन्तला—(मन में) अब देखें, आर्यपुत्र क्या कहते हैं?

राजा—(आशंका के साथ सुनकर) ओह! आप लोगों ने यह क्या झंझट खड़ा कर दिया?

शकुन्तला—(मन में) धिक्कार है! धिक्कार है!! इनकी बातें तो अभिमानपूर्वक जान पड़ती हैं।

शार्ङ्गरव—'कैसा झंझट खड़ा कर दिया' यह आप कैसे कह पाये? क्या आप ही लोग लोक-व्यवहार में निपुण हैं?

***Śakuntalā**—(To herself)* What may indeed my lord say?

***The king**—(Hearing with suspicion)* What is this brought before me?

Śakuntalā—Oh very bad, the import of his words is full of proud indeed.

Śārṅgarava—How indeed in this? You yourself are exceedingly well acquainted with the customes of the world.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तृमतीं विशङ्कते।
अतः समीपे परिणेतुरिष्यते प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः॥ १८॥

राजा—किमत्रभवती मया परिणीतपूर्वा?

शकुन्तला—(सविषादमात्मगतम्) हिअअ! संपदं संवुत्ता दे आसंका। **[हृदय! साम्प्रतं संवृत्ता ते आशङ्का।]**

जानन्नप्यजानन्निव कथं पृच्छसि इत्यर्थः। इदं=शकुन्तलारूपं, उपन्यस्तं=कण्वसविधे न्यासीकृतम्, किम् इति यदुक्तं तत् किं नाम? ननु=इति प्रश्ने, भवन्त एव=न तु तापसाः, सुतराम्=अस्मत्तोऽधिकतया, लोकवृत्तान्तेषु=लोकव्यवहारेषु, निष्णाताः=अभिज्ञाः।

अन्वयः—जनः ज्ञातिकुलैकसंश्रयां भर्तृमतीं सतीमपि अन्यथा विशङ्कते, अतः स्वबन्धुभिः प्रिया अप्रिया वा प्रमदा परिणेतुः समीपे इष्यते॥ १८॥

सतीमिति। जनः=लोकः, ज्ञातिकुलं=पितृकुलम्, एकं=केवलं, संश्रयते=अवस्थातुमवलम्बते, इति तां ज्ञातिकुलैकसंश्रयां=पितृगृहैकवासिनीम्, भर्ता=पतिः, अस्या अस्तीति तां भर्तृमतीं=सौभाग्यवतीम्, सतीं=साध्वीम्, अपीति विरोधे, अन्यथा=असतीत्वेन, विशङ्कते=विशेषेण शङ्कते, अतः=अस्मात् कारणात्, स्वबन्धुभिः=प्रमदायाः पित्राद्यात्मीयजनैः, प्रिया=मनोहारिणी, अप्रिया=अमनोहरा वा, प्रकृष्टो मदो यस्याः सा प्रमदा=युवतिः, परिणेतुः=वोढुः, समीपे=निकटे (अवस्थानाय), इष्यते=वाञ्छ्यते। अत्र अप्रस्तुतप्रशंसालङ्कारः। वंशस्थविलं वृत्तम्॥ १८॥

भावार्थः—तथा चायमेव लोकवृत्तान्तोऽत्र भवन्त एव विशेषेणाभिज्ञा अत एव लोकापवादभीरुणा गुरुणा त्वयोपेक्षिता साध्वी भवतो धर्मपत्नीयं भवत्समीपं प्रापिता तदिदानीं प्रतिगृह्यतां सहधर्माचरणायेति।

राजा—अत्रभवती=मान्या शकुन्तला, मया=दुष्यन्तेन, परिणीतपूर्वा=पूर्वं परिणीता किम्? (किमिति प्रश्ने)

शकुन्तला—(सविषादम्=सखेदम्, आत्मगतम्) साम्प्रतम्=आर्यपुत्रे एवं वदति सति, ते=तव, आशङ्का=प्रत्याख्यानभयम्, संवृत्ता=उपस्थिता।

अपने पिता के घर रहने वाली स्त्री को भले ही वह सर्वथा सती ही क्यों न हो संसार दूसरे ही (असती रूप में ही) देखता है। इसलिए वह अपने पति को प्रिय हो या अप्रिय उसके स्वजन उसे उसके स्वामी के घर ही (उसके पास ही) रखने की इच्छा करते हैं॥ १८॥

राजा—क्या ये मान्या मेरी पूर्व विवाहिता हैं?

शकुन्तला—(**खेदपूर्वक मन में**) हृदय! तुम्हारी आशङ्का अब उपस्थित (सच) हुई।

People suspect a married woman, whose only resort is her kinsmen's house, to be otherwise i.e. unchaste, though she is chaste. Hence a woman is desired by her kinsmen to be near her husband, though she may be liked or disliked by him. (18)

The King—Was this lady married by me before?

Śakuntalā—*(Sorrowfully to herself)* Heart! now, your doubt proved as right one.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शार्ङ्गरवः—

किं कृतकार्यद्वेषाद् धर्मं प्रति विमुखतोचिता राज्ञः ?

राजा—कुतोऽयमसत्कल्पनाप्रसङ्गः ?

शार्ङ्गरवः—(सक्रोधम्)

मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तानाम्॥ १९॥

राजा—विशेषेणाधिक्षिप्तोऽस्मि।

गौतमी—(शकुन्तलां प्रति) जादे! मुहुत्तअं मा लज्ज, अवणइस्संदाव दे अवगुंठणं, तदा भट्टा तुमं अहिजाणिस्सदि।[**जाते! मुहूर्त्तकं मा लज्जस्व, अपनेष्यामि तावत्ते अवगुण्ठनम्, ततो भर्त्ता त्वामभिज्ञास्यति।**] (इति तथा करोति)

शार्ङ्गरवः—कृते=स्वयमेवानुष्ठिते, कार्य्ये=शकुन्तलापरिणयरूपव्यापारे, द्वेषात्=केनापि कारणेन 'नैतत् साधु कृतम्' इत्यविहिताचारतया सम्यगवधारणात्, धर्म्मं प्रति=धर्माचरणं प्रति, विमुखता=परिणयानङ्गीकारात् पराङ्मुखता, किं राज्ञः=धर्मनियन्तुः, उचिता=युक्ता, कथमपि न इत्याशयः।

राजा—अयम्=उपस्थितः, असती=मिथ्याभूता, या कल्पना=भावना, तस्याः प्रसङ्गः= प्रसक्तिः, कस्माद् भवतीति शेषः। (मम सदैव धर्म्मं प्रत्युन्मुखत्वात् मिथ्याभूतमेतन्मयि न कदापि सम्भवतीति भवतामिदमनुचितमिति भावः।)

शार्ङ्गरवः—(सक्रोधम्=कोपेन सह) ऐश्वर्येण=वैभवेन, मत्तानाम्=गर्वितानाम्, जनानाम्, प्रायेण=सामान्यतः, अमी=कृतकार्य्यद्वेषादिरूपाः, विकाराः=स्वभावपरिवृत्तयः, मूर्च्छन्ति=उच्छ्रि-यन्ति (स्वयंकृतपरिणये सन्देहः ऐश्वर्यमदस्यायं प्रभावः)। अत्र अर्थान्तरन्यासोऽलङ्कारः, आर्य्या जातिः॥ १९॥

राजा—विशेषेण=अतिशयेन, अधिक्षिप्तः=तिरस्कृतोऽस्मि।

शार्ङ्गरव—किये हुए कार्य के प्रति द्वेषवश धर्म से आपका इस प्रकार विमुख होना क्या उचित है ?

राजा—इस दूषित कल्पना का प्रसंग ही कैसे उपस्थित हुआ ?

शार्ङ्गरव—(**क्रोधपूर्वक**) ऐश्वर्य-मद में चूर लोगों के हृदय को यह विचार प्रायः मूर्च्छित किये रहता है॥ १९॥

राजा—मैं बहुत तिरस्कृत हो चुका हूँ।

Śārṅgarava—Is it dislike to a deed or aversion to duty or wilful insult?

The king—Where from this false imaginary insident has come up?

Śārṅgarava—*(With anger)* These aberrations generally take effect in those, who are intoxicated with power. (19)

The king—I am grossly censured (much blamed).

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(शकुन्तलां निर्वर्ण्य स्वगतम्)

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्न वेत्यध्यवस्यन्।
भ्रमर इव निशान्ते कुन्दमन्तस्तुषारं
न खलु सपदि भोक्तुं नापि शक्नोमि मोक्तुम्॥ २०॥

(इति विचारयन् स्थितः)

गौतमी—(शकुन्तलां प्रति) जाते=वत्से! मुहूर्तकं=क्षणमात्रम्, मा लज्जस्व=लज्जां मा कुरु, तावत् ते=तव, अवगुण्ठनम्=वक्त्रावरणं, अपनेष्यामि=अपसारयामि। तदा, भर्त्ता=दुष्यन्तः, त्वाम्, अभिज्ञास्यति=तव मुखदर्शनात् सेयमिति परिचयं प्राप्स्यति। (इति=एवमुक्त्वा, तथा करोति=अवगुण्ठनमपसारयति।)

राजा—(शकुन्तलां निर्वर्ण्य=विलोक्य, स्वगतम्)

अन्वयः—एवम् उपनतम् अक्लिष्टकान्तिः इदं रूपं प्रथमं परिगृहीतं स्यात् न वा इति अध्यवस्यन् (अहम्) निशान्ते अन्तस्तुषारं कुन्दं भ्रमर इव सपदि भोक्तुं न खलु शक्नोमि, मोक्तुमपि न शक्नोमि॥ २०॥

इदमिति। एवम्=अनेन प्रकारेण, अप्रयत्नेनैव, उपनतम्=अग्रे उपस्थितम्, अक्लिष्टा=अम्लाना, कान्तिः=शोभा, यस्य अक्लिष्टकान्तिः, इदं=पुरोवर्त्ति, रूपम्=सौन्दर्यं (सौन्दर्याधानभूतरमणीविशेषं), प्रथमं=पूर्वम्, परिगृहीतम्=गान्धर्वविधिना मया परिणीतं स्यात्, न वा=न परिगृहीतम्, इति=अस्मिन् विषये, अध्यवस्यन्=निश्चेतुं व्यवस्यन् (अहम्), निशान्ते=प्रत्यूषे, अन्तः=मध्ये,

---

गौतमी—(**शकुन्तला से**) पुत्री! क्षणभर के लिए लज्जा को छोड़ो, मैं तेरा घूंघट उठाऊँगी, तब तुम्हारे पति तुम्हें पहचानेंगे। (**वैसा ही करती है—घूंघट हटाती है।**)

राजा—(**शकुन्तला को देखकर मन में**) जिसके भीतर तुषार विद्यमान हो ऐसे कुन्द के पुष्प को प्रातःकाल के समय जैसे भौंरा न भोग सकता है और न त्याग ही सकता है ठीक उसी प्रकार अनायास अपने सामने उपस्थित इस सौन्दर्य-राशि को पाकर भी 'मैंने इसे पहले अपनाया है या नहीं' इस सन्देह में पड़कर, मैं न तो इसका उपभोग ही कर सकता हूँ और न इसे त्याग ही सकता हूँ॥ २०॥

(इस प्रकार विचार करता हुआ बैठता है)

Gauttamī—Daughter! for a moment be not bashful. I shall just remove your veil. Then your husband will recognise you. *(does as said)*

The king—*(Observing Śakuntalā to himself)* Not deciding whether this beautiful form, which is thus presented (before me) was or was not accepted (by me in marriage) before, I am indeed neither able, all of a sudden, to enjoy nor to abandon it, like a black bee at the break of day the kunda flower with due inside. (20)

(Remains reflecting)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतीहारी—(स्वगतम्) अम्मो! धम्मावेक्खिणो भट्टिणो। ईदिसं णाम सुहोवणदं इत्थीरअणं पेक्खिअ को अण्णो विआरेदि। [**अहो! धर्मावेक्षिणो भर्त्तारः। ईदृशं नाम सुखोपनतं स्त्रीरत्नं प्रेक्ष्य कोऽन्यो विचारयति।**]

शार्ङ्गरवः—भो राजन्! किमिति जोषमास्यते?

राजा—भोस्तपस्विनः! चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि, तत्कथमिमामभिव्यक्तसत्त्वलक्षणामात्मानमक्षत्रियं मन्यमानः प्रतिपत्स्ये?

तुषारः=नीहारः, यस्य तदन्तस्तुषारम्, कुन्दं=तदाख्यं कुसुमम्, भ्रमरः=द्विरेफ इव, सपदि=सहसा, भोक्तुम्=सेवितुम्, न खलु शक्नोमि (राजपक्षे शकुन्तलायाः परकीयेति सन्देहात् परकीयस्य भोगे अपवादभयात्, भ्रमरपक्षे कुन्दस्यान्तस्तुषारत्वेन स्पष्टतया कृतेरपरिज्ञानात्तुषारस्य च भ्रमरस्यासह्यत्वात्), मोक्तुम्=परित्यक्तुमपि, न शक्नोमि। अत्र श्रौतोपमालङ्कारेण सन्देहालङ्कारः सङ्कीर्यते, अनुप्रासश्च। मालिनी नाम वृत्तम्॥ २०॥

भावार्थः—अनायासेनोपलब्धमिदं रूपं संशयितचित्ततया स्वकीयपरकीयत्वसन्देहात् परकीयत्वस्य भोगे प्रत्यावायापादकत्वात्, परमसुखास्पदत्वेनात्मनः परिगृहीतत्वेन च पश्चादस्वीकारे नरकपातस्यावश्यम्भावात् सपदि न भोक्तुं शक्नोमि न च मोक्तुं शक्नोमि।

भ्रमरपक्षे—कुन्दस्यान्तस्तुषारत्वेन स्पष्टतयाकृतेरपरिज्ञानात्तुषारस्य भ्रमरस्यासह्यत्वात् तथा दर्शनेन मधुपानेच्छायाः प्रबलमुदयात् सपदि न भोक्तुं नापि मोक्तुं शक्नोमीति भावः॥ २०॥

(इति विचारयन्=वितर्कयन् स्थितः।)

प्रतीहारी—(स्वगतम्) राजानं प्रशंसयन् कथयति—अहो इति विस्मये। धर्ममवेक्षन्ते= सर्वथा पालनीयत्वेन धर्म्मं पश्यन्तीति धर्म्मावेक्षिणः, भर्त्तारः=राजानः, ईदृशं=परमरमणीयम्, सुखेन=अनायासेन, उपनतम्=उपगतम्, स्त्रीरत्नमिव=स्त्रीरत्नम्, उत्कृष्टस्त्रियम्, प्रेक्ष्य=दृष्ट्वा, कोऽन्यः=भर्तृभिन्नो जनः, विचारयति=गृह्णामि वा न वेति विमृशति। न कोऽपीत्यर्थः।

शार्ङ्गरवः—भो राजन्! भो इति अनादरसम्बोधने, जोषं=तूष्णीम्, किमिति=कथमिव, आस्यते=उपविश्यते।

राजा—भोस्तपस्विनः=तापसाः! चिन्तयन्नपि=विचारयन्नपि, अत्रभवत्याः=शकुन्तलायाः

प्रतीहारी—(मन में) स्वामी भी कितने धर्मापेक्षी होते हैं। यदि ऐसा न होता तो इस प्रकार अनायास उपस्थित इस प्रकार के स्त्रीरत्न को पाकर भला कौन (उसे अपनाने में) आनाकानी करता।

शार्ङ्गरव—ओ महाराज! आप (इस प्रकार) मौन क्यों हैं?

राजा—ओ तपस्वियो! बार-बार विचार करने पर भी मैं इस बात को स्मरण नहीं कर पा रहा हूँ कि मैंने कभी इन आर्या का पाणिग्रहण किया है। तब भला मैं स्वयं को क्षत्रिय न

Door-keeper—(To herself) Oh our lord's regard for righteousness! indeed, who else will deliberate on seeing such beauty, which thus easily brought?

Śārṅgarava—Oh king! why is it that you sit silent?

The king—O' ascetics! though thinking about it, I do not

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(स्वगतम्) हद्दी हद्दी। कधं परिणए ज्जेव संदेहो। भग्गा दाणिं दूरारोहिणी आसालदा। [**हा धिक् हा धिक्! कथं परिणय एव सन्देहः। भग्ना इदानीं दुरारोहिणी आशालता।**]

शार्ङ्गरवः—मा तावत्—

कृतावमर्शामनुमन्यमानः सुतां त्वया नाम मुनिर्विमान्यः।
मुष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन॥ २१॥

माननीयायाः, स्वीकरणम्=केनापि विधिना परिणयनम्, न खलु स्मरामि। तत्=तस्मात्, अभिव्यक्तं=स्पष्टमनुभूयमानम्, सत्त्वस्य=गर्भस्य, लक्षणं=चिह्नं, यस्यास्ताम्=अभिव्यक्तसत्त्वलक्षणाम्, इमाम्=शकुन्तलाम्, अक्षत्रियं=क्षत्रियजातीतरम्, आत्मानम्=मन्यमानः जानन्, प्रतिपत्स्ये=अङ्गीकरिष्ये ? कथमपि न।

शकुन्तला—(स्वगतम्) हा धिक् हा धिक् इति द्विरुक्तिः विषादस्य चरमभावं सूचयति, परिणये एव=विवाहे एव, सन्देहः=संशयः, कथम्=केन प्रकारेण, इदानीं=राजसदनमासाद्य, दूरारोहिणी—दूरम्=अतिभूमिम्, आरोहतीति दूरारोहिणी=अतिवितता, आशैव लतेत्याशालता=वासनारूपा लता, भग्ना=विच्छिन्ना। (राजसदनमासाद्य, चक्रवर्तिनं तनयं प्रसूय राजमहिषी भूत्वा सर्वसुखमनुभविष्यामि इति आशालता भग्ना।)

शार्ङ्गरवः—मा तावद्=विपरीतमिदमित्यर्थः।

अन्वयः—कृतावमर्शां सुताम् अनुमन्यमानः मुनिः त्वया नाम विमान्यः मुष्टं स्वम् अर्थं प्रतिग्राहयता येन दस्युः इव पात्रीकृतोऽसि॥ २१॥

कृतावमर्शामिति। कृतः=त्वयैव विहितः, अवमर्शः=बलात् स्पर्शः सुरतं वा, यस्याः कृतावमर्शाम्, सुतां=तनयाम्, अनुमन्यमानः=क्रोधादिकमकृत्वैवानुमोदमानः, मुनिः=ऋषिः,

---

मानकर एक ऐसी स्त्री को कैसे स्वीकार कर सकता हूँ, जिसके गर्भवती होने के लक्षण स्पष्ट दिखायी दे रहे हों।

शकुन्तला—(स्वगत) हाय! हाय! तो क्या पाणिग्रहण में ही सन्देह है। तब तो ऊँचे चढ़ने वाली मेरी आशरूपी लता ही नष्ट हो गई।

शार्ङ्गरव—ऐसा नहीं।

आपने इस कन्या का स्पर्श किया है और महर्षि कण्व ने इस बात की सराहना की है, अतः आप उनका अपमान न करें; क्योंकि यह सब ऐसा ही है जैसे कोई किसी का धन चुरा

---

really recollect having accepted this lay in marriage. How then shall I, who suspect myself to be merely a nominal husband to her, who bears evident signs of pregnancy, accept her.

***Śakuntalā**—(To herself)* The noble sir has doubts even as regards marriage. Whence now my high soaring hope?

Śārṅgarava—Indeed do not.

Rightly does the sage, who approves of his daughter, **who is outraged**, deserve to be disrespected by you-(the sage) who, urging

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शारद्वतः—शार्ङ्गरव! विरम त्वमिदानीम्। शकुन्तले! वक्तव्यमुक्तमस्माभिः, सोऽयमत्रभवानेवमाह, दीयतामस्मै प्रत्ययं प्रतिवचनम्।

शकुन्तला—(स्वगतम्) इमं अवत्थंतरं गदे तादिसे अणुराए किं वा सुमराविदेण। अधवा अत्ता दाणिं मे सोधणीओ होदु त्ति किंचिवदिस्सं। (प्रकाशम्) अज्जउत्त! (इत्यर्द्धोक्ते) अधवा संसइदो दाणिं एसो समुदाचारो। पोरव! जुत्तं णाम तुह पुरा अस्समपदे सब्भावुत्ताणहिअअं इमं जणं तधा समअपुब्बअं संभाविअ संपदं ईदिसेहिं अक्खरेहिं पच्चाक्खदुं। **[इदमवस्थान्तरं गते तादृशेऽनुरागे किं वा स्मारितेन; अथवा आत्मेदानीं मे शोधनीयो भवतु; इति किञ्चिद्वदिष्यामि। आर्य्यपुत्र! अथवा संशयित इदानीमेष समुदाचारः।**

त्वया=भवता, मा तावद् विमान्यः=नावमाननीयः। (यतः) मुष्टं=चोरितम्, स्वं=स्वीयम्, अर्थम्=धनम्, प्रतिग्राहयता=कस्मैचित् प्रत्यर्पयता, येन=मुनिना, दस्युः=तस्कर इव, पात्रीकृतोऽसि=त्वं सम्प्रदानीकृतः असि। अत्र श्रौतोपमालङ्कारः, विषमालङ्कारोऽपि च। उपजातिः ॥ २१ ॥

भावार्थः—मुनेरनुमतिमगृहीत्वैव तदीयामात्मजां शकुन्तलां निर्जने गान्धर्वविधानेन परिणयन्नपि तज्ज्ञात्वात्मानुमत्यभावेऽपि विनापि रोषेण येन मुनिना त्वं तादृशपरिणयेऽगतिकप्रीत्या वरीकृतोऽसि, तादृशसरलचेतसस्तस्य मुनेर्दुहितुः प्रत्याख्यानेन त्वया विमाननकरणमतीवासङ्गतमिति तदनुरोधप्रत्याख्यानेन स च मुनिः कथमपि नावमाननीय इति भावः ॥ २१ ॥

शारद्वतः—शार्ङ्गरव! त्वम्, इदानीम्=सम्प्रति, विरम=मौनमवलम्बस्व। शकुन्तले! वक्तव्यम्=त्वत्सम्बन्धे यत् कथनीयम्, अस्माभिः, तत् सर्वम्, उक्तम्=कथितम्, सोऽयम्=यमुद्दिश्योक्तः, सः=राजा दुष्यन्तः, एवं=भवत्याः श्रुतरूपम्, आह=ब्रवीति, अस्मै=राज्ञे, प्रत्ययप्रतिवचनं= विश्वासजनकमुत्तरम्, दीयताम्।

शकुन्तला—(स्वगतम्=अनतिप्रकाशम्) तादृशे=पूर्वानुभूते, अनुरागे=स्नेहे, इदम-

---

ले और धन का स्वामी उस चोर को पकड़कर भी उसे ही सारा धन सौंप दे। ठीक उसी प्रकार आपने ऋषि कण्व की कन्या को परोक्ष में गान्धर्व विधि से ग्रहण किया और इस समाचार को जानकर उन्होंने आप ही को इस कन्या के योग्य वर मानकर इसे आपके पास भेजा॥ २१ ॥

शारद्वत—शार्ङ्गरव! अब तुम चुप रहो। शकुन्तले! हमें तुम्हारे सम्बन्ध में जो कहना था कह चुके। (उसे सुनकर भी) ये महाराज ऐसा कह रहे हैं, अतः अब तुम्हीं इन्हें विश्वासजनक उत्तर दो।

शकुन्तला—(**स्वगत**) जबकि वह पुराना अटूट स्नेह इस विषमावस्था में आ पहुँचा है तब स्मरण दिलाने से भी क्या लाभ? अथवा इस समय अपनी आत्मा की शुद्धि के लिए मैं

---

to accept his own property, that was stolen, has rendered you, like a robber (thief), a worthy recipient of it. (21)

Śāradwata—Śārṅgarava! stop you now. Śakuntalā! we have said what was to be said. Here his majesty says so. Let a convincing reply be given him by you.

Śakuntalā—(To herself) **Such affection having gone to this**

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पौरव! युक्तं नाम तव पुरा आश्रमपदे सद्भावोत्तानहृदयमिमं जनं तथा समयपूर्वकं सम्भाव्य साम्प्रतमीदृशैरक्षरैः प्रत्याख्यातुम्।]

राजा—(कर्णौ पिधाय) शान्तं शान्तम्—

व्यपदेशमाविलयितुं समीहसे मां च नाम पातयितुम्।
कूलङ्कषेव सिन्धुः प्रसन्नमोघं तटतरुञ्च॥ २२॥

वस्थान्तरं=वैपरीत्यदशाम्, गते=प्राप्ते सति, स्मारितेन=स्मरणोत्पादनायासेन, किं वा फलम्=किञ्चिदपि न। अथवा, आत्मा=स्वजीवात्मा, इदानीम्=सम्प्रति, शोधनीयः भवतु=निष्पापीकरणीयः भवतु (यदि मत्कृतविश्वासजननकोत्तरेणापि कदाचिद्राजा मां स्मरेदिति पश्चादात्मग्लानिर्भवेदिति भावः), इति हेतोः, प्रत्ययोत्पादनाय किञ्चिद्वदिष्यामि=कथयिष्यामि, राजानमुद्दिश्य इति भावः। आर्य्यपुत्र!=स्वामिन् (इत्यर्द्धोक्ते न तु पूर्णरूपेण उच्चार्य्य), अथवा, इदानीं=सम्प्रति परिणयानङ्गीकरणकाले, एषः=आर्यपुत्रपदप्रयोज्यः, समुदाचारः=शिष्टाचारपरकव्यवहारः, संशयितः=मद्विषये संशयापन्नः। पौरव!=हे पुरुवंशोद्भव! आश्रमपदे=तपोवने, पुरा, सद्भावोत्तानं हृदयं—सद्भावेन=तव सद्व्यवहारेण, उत्तानं=विपर्यस्तगाम्भीर्य्यं, हृदयं यस्य तम्, इमं जनं=माम्, तथा=तादृशेन वाक्येन, समयपूर्वकं=प्रतिज्ञापूर्वकम्, सम्भाव्य=आश्वास्य, साम्प्रतम्=इदानीम्, ईदृशैः='न खलु चिन्तयन्नपि स्वीकरणमत्रभवत्याः स्मरामि' इत्यादिरूपैः, अक्षरैः=वर्णैः, प्रत्याख्यातुम्=निराकर्त्तुम्, तव **युक्तं** नाम=उचितं नाम, नैव।

राजा—(कर्णौ पिधाय=श्रवणे कराभ्यामाच्छाद्य) शान्तम्, शान्तम्=अलीकम्, मिथ्यैतदिति भावः।

अन्वयः—कूलङ्कषा सिन्धुः प्रसन्नमोघं तटतरुञ्च इव प्रसन्नं व्यपदेशम् आविलयितुं मां च पातयितुं समीहसे॥ २२॥

व्यपदेशमिति। कूलं=तटं, कषति=भिनत्ति, इति कूलङ्कषा=तटभङ्गकारिणी, सिन्धुः=नदी,

---

कुछ कहूँगी। **(प्रगट)** आर्यपुत्र **(इतना आधा कहकर ही)** पौरव! उस समय आश्रम में अतीव सौम्य व्यवहार से उच्च आशाओं से भरे हुए हृदययुक्त इस व्यक्ति को शपथपूर्वक आश्वासन देकर अब इस प्रकार की बात कहना क्या आपके लिए उचित है?

राजा—(दोनों कान ढाँपकर) चुप रहो, चुप रहो (पाप शान्त हो)—

जैसे एक तटभंजनी नदी निर्मल जलप्रवाह को कलुषित तथा तटस्थ वृक्ष को गिराने का प्रयत्न करती है उसी प्रकार तुम भी हमारे विशुद्ध वंश को कलंकित और मुझे पतित बना देना चाहती हो॥ २२॥

---

changed state, what possibly (can be obtained) by reminding? My own self has now to be lamented this is settled here. *(Aloud)* My lord *(When half said)* when now the marriage is doubted, this is not the proper form. O' Purū's descendent! Is it indeed proper for you, having formerly in that way deceived this person, naturally open-minded, after an agreement in the hermitage, to repudiate her now with such words?

The king—*(Shutting his ears)* May sin be averted.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—भोदु, जइ परमत्थदो परपरग्गहसंकिणा तुए एव्वं पउत्तं, ता अहिण्णाणेण केण वि तुह आसंकं अवणइस्सं। [**भवतु, यदि परमार्थतः परपरिग्रहशङ्किना त्वया एवं प्रवृत्तम्, तदभिज्ञानेन केनापि तव आशङ्कामपनेष्यामि।**]

राजा—प्रथमः कल्पः।

शकुन्तला—(मुद्रास्थानं परामृश्य) हद्दी हद्दी! अंगुलीअअसूण्णा मे अंगुली। [**हा धिक् हा धिक्! अङ्गुरीयकशून्या मे अङ्गुली।**] (इति सविषादं गौतमीमुखमीक्षते)

प्रसन्नं=निर्दोषं स्वच्छं च, ओघं=वारिप्रवाहं, प्रसन्नमोघम्, तटतरुञ्च=तटस्थवृक्षञ्च, इव, प्रसन्नं=निर्दोषं, व्यपदिश्यते=समाजे कीर्त्यतेऽनेनेति स तं, व्यपदेशं=कुलम्, आविलयितुं=कलुषीकर्त्तुम्, ओघपक्षे—भज्यमानतीरमृत्तिकासंसर्गेणाविलीकर्त्तुम्, मां=दुष्यन्तम् (क्षत्रियधर्मसेविनम्), पातयितुं=परस्त्रीसंसर्गेण पतितं कर्त्तुं, तटतरुपक्षे—खातमूलमृत्तिकतया जले पतनप्रवणीकर्त्तुम्, समीहसे=सम्यग्रूपेण यतसे वाञ्छसि वा। अत्र पूर्णोपमालङ्कारः, यथासंख्यञ्च। आर्य्या जातिः॥ २२॥

भावार्थः—यथा तटभङ्गकारिणी नदी स्वकीयस्वच्छवारिप्रवाहं कलुषीकर्तुं तटस्थवृक्षञ्च पातयितुं समीहसे तथैव निर्दोषं मे कुलं मां च स्वसंसर्गेण कलुषीकर्त्तुं त्वं समीहसे इति भावः॥ २२॥

शकुन्तला—भवतु=मद्वचनविरतिः, यदि, परमार्थतः=याथार्थ्येन, परस्य परिग्रहं=कलत्रं, शङ्कते, तेन परपरिग्रहशङ्किना=परस्त्रीसन्देहिना, त्वया=भवता, एवम्=उक्तविधया, प्रवृत्तम्=उपक्रान्तम्, तद्=तदा, अभिज्ञायते=परिचीयते, अनेनेति तेन अभिज्ञानेन=सम्यक्परिचायकेन, प्रत्ययहेतुनाऽङ्गुलीयकेनेति भावः, केनापि, तव आशङ्काम्=सन्देहम्, अपनेष्यामि=अपसारयिष्यामि।

राजा—प्रथमः=प्रधानः, कल्पः=न्यायः (अभिज्ञानप्रदर्शनं मम सन्देहनिराकरणे प्रधानोपायः।)

शकुन्तला—यदि सत्य ही आप मुझे परस्त्री समझकर ऐसा कह रहे हैं तो मैं किसी चिह्न को दिखाकर आपके सन्देह को दूर करने का प्रयत्न करूँगी।

राजा—यह प्रथम कार्य है। (मेरे सन्देह को दूर करने का यह प्रधान उपाय है।)

शकुन्तला—(**अँगूठी पहनने के स्थान को टटोलकर**) हाय हाय—मेरी अंगुली तो अँगूठी से शून्य है। (**ऐसा कहकर सविषाद गौतमी की ओर देखती है**)

Why do you seek to sully (to stain) my family and degrade this person (my self), like a river, dashing against its banks, does to render turbid (to make dirty) its lucid water and to fell the tree on the bank. (22)

Śakuntalā—Well, if you are really suspecting me to be the wife of another, you are saying in this way, then by some sign of recognition, I shall remove your doubt.

The king—This should be the first work (i.e. a good proposal).

Śakuntalā—*(Feeling at the place of the ring)* Oh alas! oh alas! void of the ring is my finger. *(Looks at Gautamī with sorrow)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गौतमी—नूणं दे सक्कावदारे सचीतीत्थोदअं वंदमाणाए पब्भट्टं अंगुलीअअं। **[नूनं ते शक्रावतारे शचीतीर्थोदकं वन्दमानायाः प्रभ्रष्टमङ्गुरीयकम्।]**

राजा—(सस्मितम्) इदं तावत्प्रत्युत्पन्नमतित्वं स्त्रीणाम्।

शकुन्तला—एत्थं दाव विहिणा दंसिदं पउत्तणम्। अवरं दे कधइस्सं। **[अत्र तावत् विधिना दर्शितं प्रभुत्वम्। अपरं ते कथयिष्यामि।]**

राजा—श्रोतव्यमिदानीं संवृत्तम्।

शकुन्तला—णं एक्कदिअहे वेदसलदामंडवे णलिणीवत्तभाअणगदं उदअं तुह हत्थे सण्णिहिदं आसी। **[ननु एकदिवसे वेतसलतामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते सन्निहितमासीत्।]**

शकुन्तला—(मुद्रास्थानम्=अङ्गुलीयकधारणस्थानं, परामृश्य=स्पृष्ट्वा) हा धिक् हा धिक् इति विषादातिशये द्विरुक्तिः, मे=मम, अङ्गुली, अङ्गुरीयकशून्या=मुद्राविरहिता। (इति=इत्युक्त्वा, सविषादं=सखेदम्, गौतमीमुखम्=तापस्या आननम्, ईक्षते=अवलोकयति।)

गौतमी—नूनम्=निश्चितम्, ते=तव, शक्रावतारे=गङ्गातीरैकदेशे, शचीतीर्थस्य=इद्राणी-निर्मिततडागस्य, उदकं=तोयम्, वन्दमानाया=प्रणमन्त्याः, (तव) अङ्गुलीयकम्, प्रभ्रष्टम्=अङ्गुल्याः स्खलितम्।

राजा—(सस्मितम्=सेषद्धासम्) इदं=कथनम्, तावत्, स्त्रीणाम्, प्रतिविषयमुत्पन्ना मतिर्यासां तासां भावस्तत्त्वं प्रत्युत्पन्नमतित्वम्=उपस्थितबुद्धित्वम्।

शकुन्तला—अत्र तावत्=साक्षात् अङ्गुरीयकदर्शने, विधिना=स्वेच्छापरिकल्पितलोक-तन्त्रेण, प्रभुत्वम्=अङ्गुरीयकहरणेन मद्वैमुख्ये सामर्थ्यम्, दर्शितम्=प्रकटितम्। अपरम्=अभिज्ञा-नानन्तरम्, ते=तुभ्यम्, कथयिष्यामि।

राजा—इदानीम्=साम्प्रतम्, श्रोतव्यम्=श्रवणार्हम्, संवृत्तम्=सञ्जातम्।

गौतमी—निश्चय ही शक्रावतार के शचीतीर्थ के जल को प्रणाम करते समय तुम्हारी अँगूठी फिसल कर गिर गई है।

राजा—(**मुस्कराकर**) यही स्त्रियों का प्रत्युत्पन्नमतित्व (तत्काल बात बना लेने की क्षमता) है।

शकुन्तला—इस विषय में तो विधि ने अपनी प्रभुता दिखा दी है, अब मैं दूसरी (परिचय कराने वाली) बात कहूँगी।

राजा—इस समय मैं (सब कुछ) सुनने के लिए तैयार हूँ।

Gautamī—In all probability your ring slipped as you were doing obeisance salutation to the water of the Śacītīrtha with in Śakrā-vatāra.

The king—*(Smiling)* Here is what is called, 'women is ready witted'.

Śakuntalā—Here ofcourse fate has shown its sovereignty. I shall tell you another thing.

The king—It has now become a thing to be heard.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—शृणुमस्तावत्।

शकुन्तला—तक्खणं सो मे पुत्तकिदओ दीहापंगो णाम मिअपोदओ उवट्ठिदो। तदो तुए अअं दाव पढमं पिअदु त्ति अणुकंपिणा उवच्छंदिदो उदएण। ण उण सो अपरिचिदस्स दे हत्थादो उदअं उवगदो पादुं। पच्चा तस्सिं ज्जेव उदए मए गहिदे किदो तेर पणओ। एत्थंतरे विहसिअ तुए भणिदं, सव्वो सगणे वीससदि, जदो दुवे वि तुम्हे आरण्णआओ त्ति। [**तत्क्षणं स मे पुत्रकृतको दीर्घापाङ्गो नाम मृगपोतक उपस्थितः। ततस्त्वया अयं तावत् प्रथमं पिबत्विति अनुकम्पिना उपच्छन्दित उदकेन। न पुनः सः अपरिचितस्य ते हस्तादुदकमुपगतः पातुम्। ततस्तस्मिन्नेवोदके मया गृहीते कृतस्तेन प्रणयः। अत्रान्तरे विहस्य त्वया भणितम्, सर्वः स्वगणे विश्वसिति, यतो द्वे एव युवामारण्यके इति।**]

शकुन्तला—नन्विति सम्बोधने, एकदिवसे=दिने, वेतसलतामण्डपे, नलिनीपत्रं=कमल-लतापत्रमेव, भाजनं=पात्रं, तस्मिन् गतं=स्थितम्, नलिनीपत्रभाजनगतम्, उदकं=जलं, तव, हस्ते=करे, सन्निहितम्=सम्यक् स्थापितम् आसीत्।

राजा—शृणुमस्तावत्=आकर्णयामस्तावत्।

शकुन्तला—तत्क्षणं=तत्कालम्, सः=पूर्वोक्तः, मे=मम, पुत्रकृतकः=पुत्रत्वेन परि-कल्पितः, दीर्घौ=आयतौ, अपाङ्गौ=नेत्रप्रान्तौ, यस्य सः=दीर्घापाङ्गः, नाम=एतन्नामकः, मृगपोतकः=मृगशावः, उपस्थितः=समायातः। ततः=तदा, त्वया=भवता, अयं=मृगपोतकः, प्रथमं पिबतु=मुखप्रक्षालनादिकं पश्चात् सम्पाद्य इत्युक्त्वा, अनुकम्पिना=दयाशालिना त्वया, उदकेन=तेन नलिनीदलभाजनगतजलेन, उपच्छन्दितः=पानार्थं सादरम् अभ्यर्थितः। स पुनः=मृगपोतकः, अपरि-चितस्य=अजातपरिचयस्य, ते=तव, हस्तादुदकं पातुं नोपागतः। ततः=तदनन्तरम्, तस्मिन्नेवोदके=पूर्वोक्तनलिनीदलभाजनगते एव जले, मया=शकुन्तलया, गृहीते, तेन=मृगपोतकेन, प्रणयः=

शकुन्तला—एक दिन वेत्रलतामण्डप में आपके हाथ में कमलपत्र के दोने में जल था।

राजा—हाँ; हम सुन रहे हैं।

शकुन्तला—उसी समय मेरा कृत्रिम पुत्र दीर्घापाङ्ग नामक मृगशावक वहाँ आया। दयावश 'यह पहले जल पीओ' यह कहकर आपने उससे जल पीने का आग्रह किया, परन्तु उसने आपको अपरिचित समझकर जल नहीं पीया। इसके पश्चात् जब वही कमलिनी के पत्र में रखा हुआ जल मैंने अपने हाथ में लिया तो वह स्वयं उसे पीने के लिए मचल उठा। इस

Śakuntalā—Well! on one day in the bower of the bamboos, water lying in a lotus-leaf-vessel was present in your hand.

The king—Well, we are listening.

Śakuntalā—At that moment that young deer, which was adopted by me as a child, Dīrghāpāṅga named, arrived. He was coaxed with water by you, who observed with pity. 'Let him just drink first.' But through unfamiliarity he did not approach the vicinity (neighburhood) of your hand. Afterwards when the same

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा– आभिस्तावदात्मकार्य्यप्रवर्त्तिनीभिर्मधुराभिरनृतवाग्भिराकृष्यन्ते विषयिणः।

गौतम—महाभाअ! णारिहसि एव्वं मंतिदुं। तवोवणसंवड्ढिदो क्खु अअं जणो अणभिण्णो कइत्तवस्स। [**महाभाग! नार्हसि एवं मन्त्रयितुम्। तपोवनसंवर्द्धितः खल्वयं जनः अनभिज्ञः कैतवस्य।**]

राजा—अयि तापसवृद्धे!

स्त्रीणामशिक्षितपटुत्वममानुषीणां सन्दृश्यते किमुत याः परिबोधवत्यः।
प्रागन्तरीक्षगमनात् स्वमपत्यजातमन्यद्विजैः परभृताः किल गोषयन्ति॥ २३॥

पानार्थमाग्रहः, कृतः। अत्रान्तरे, विहस्य=हासं कृत्वा, त्वया=भवता, भणितम्=कथितम्, सर्वः= सकल एव प्राणिसमुदायः, स्वगणे=आत्मीयवर्गे, विश्वसिति। यतः=यस्मात् कारणात्, युवां= मृगपोतकश्च त्वं च, एव आरण्यके वनवासिन्यौ इति।

राजा—आत्मकार्येषु=स्वोद्देश्येषु, प्रवर्तयितुं=पुरुषान् व्यापादयितुं, शीलं=स्वभावः, यासां ताभिरात्मकार्यप्रवर्त्तिनीभिः=स्वकार्यसाधिनीभिः, मधुराभिः=प्रियाभिः, आभिः=ईदृशीभिः, अनृत-वाग्भिः=असत्यकथनैः, विषयिणः=कामिनः पुरुषाः, आकृष्यन्ते=वशीक्रियन्ते।

गौतमी—महाभाग! एवम्=इत्थम्, मन्त्रयितुं=वक्तुम्, नार्हसि। अयं जनः=शकुन्तला, खलु, तपोवने=मुनीनामाश्रमे, संवर्द्धितः=प्रतिपालितः, कैतवस्य=कपटव्यवहारस्य, अनभिज्ञः= अज्ञाता। (छलप्रपञ्चमिथ्याभाषणादिदोषरहिते आश्रमे परिवर्द्धितत्वादनयाऽऽज्ञातकैतवया सत्यमेव भणितम्।)

राजा—तापसेषु=तपस्विजनेषु वृद्धेति तापसवृद्धेति तत्सम्बोधने हे तापसवृद्धे!

अन्वयः—अमानुषीणां स्त्रीणाम् अशिक्षितपटुत्वं सन्दृश्यते, याः परिबोधनवत्यः ताः किमुत? परभृताः अन्तरीक्षगमनात् प्राक् स्वम् अपत्यजातम् अन्यद्विजैः पोषयन्ति किल॥ २३॥

पर आपने हँसकर कहा—''सब लोग अपने आत्मीय पर ही विश्वास करते हैं, तुम दोनों ही वनवासी हो न।''

राजा—स्त्रियाँ अपना कार्य बनाने के लिए ऐसी मिथ्या और मधुर बातें कहकर ही कामीजनों को अपनी ओर आकर्षित किया करती हैं।

गौतमी—महाभाग! आपको ऐसा कहना शोभा नहीं देता; क्योंकि तपोवन में पालन-पोषण होने के कारण यह छल-कपट से सर्वथा अनभिज्ञ है।

राजा—अरी वृद्ध तपस्विनी!

---

water was taken by me, he made love to it. Then you thus said in joke 'All confide in their relatives, both of you are foresters.'

The king—Voluptuaries are allured by such and other honeyed words, full of falsehood of women, who seek to accomplish their own purpose.

Gautamī—Noble sir! It behoves you not to say so. Brought up in a penance-grove, this person is unacquainted with deceit.

The king—Old ascetic woman!

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(सरोषम्) अणज्ज! अत्तणो हिअआणुमाणेण किल सव्वं पेक्खसि। को णाम अण्णो धम्मकंचुअव्वदेसिणो तिणच्छण्णकूवोवमस्स तुह अणुआरी भविस्सदि। **[अनार्य! आत्मनो हृदयानुमानेन किल सर्वं प्रेक्षसे। को नाम अन्यो धर्मकञ्चुकव्यपदेशिनस्तृणच्छन्नकूपोपमस्य तव अनुकारी भविष्यति।]**

स्त्रीणामिति। अमानुषीणाम्=मानुषीभिन्नानामपि, स्त्रीणाम्=स्त्रीजातेः, अशिक्षितपटुत्वम्=अनुपदिष्टवञ्चनाकौशलम् (नैसर्गिकं चातुर्य्यम्), सन्दृश्यते=संलक्ष्यते। याः परिबोधवत्यः=सर्वतोभावेन ज्ञानवत्यः (व्यवहारकुशला मानुष्यः), ताः किमुत? अशिक्षितपटुत्वे किं वक्तव्याः? परैः=काकैः, भ्रियन्ते=बाल्यकाले पुष्यन्ते, इति परभृताः=कोकिलस्त्रियः, अन्तरि=मध्ये, क्षयतीत्यन्तरीक्षम्, तस्मिन् गमनात्=उड्डयनात्, प्राक्=पूर्वम्, स्वम्=स्वकीयम्, अपत्यजातम्=सन्तानसामान्यम्, अन्यद्विजैः=काकैः (अपरपक्षिभिः), पोषयन्ति=पालयन्ति, किलेति लोकवार्तायाम्। अत्र अर्थान्तरन्यासोऽलङ्कारः अप्रस्तुतप्रशंसा च। वसन्ततिलकं वृत्तम्॥ २३॥

भावार्थः—कोकिलाः स्वान्यपत्यानि काककुलायेषु निक्षिपन्ति, काकाश्च स्वापत्यबुद्ध्या तानि पोषयन्ति—अन्तरिक्षगमनात् प्राक् इति प्रसिद्धिः, तथा च पक्षित्वे सत्यपि कोकिलाया ईदृशचातुर्य्यदर्शनात् मानुषीरूपायाः शकुन्तलायास्तपोवनवर्द्धितत्वेऽपि सङ्गतानृतवादित्वरूपं पटुत्वं भविष्यतीत्यर्थे नास्ति सन्देहावसर इति भावः॥ २३॥

शकुन्तला—(सरोषम्=सकोपम्) अनार्य=दुराचारिन्! आत्मनः=स्वस्य, हृदयानुमानेन=मम हृदयमिव परस्य हृदयमपि वञ्चनापरमेवेति कल्पने, सर्वं=जनम्, वञ्चकतापूर्णहृदयमिति भावः, प्रेक्षसे किल=पश्यसि किल। अन्यः कः=जनः, धर्म एव कञ्चुकः=बहिरङ्गावरणविशेषः, तेन व्यपदिशति=आत्मानं धार्मिकं प्रकटयतीति तस्य धर्मकञ्चुकव्यपदेशिनः=धर्मविचाररूपकञ्चुके प्रविष्टस्य (बहिर्धर्म्मावरणेनान्तःप्रतारणादि दोषमदर्शयतः), मया परभार्य्या नाङ्गीक्रियत इति दम्भ-

---

मनुष्य जाति से भिन्न पशु-पक्षी आदि की स्त्रियों में भी नैसर्गिक चातुरी पायी जाती है, फिर सब विषयों में बुद्धि रखने वाली मनुष्य जाति की स्त्रियों की तो बात ही दूसरी है। कोकिल आकाश में उड़ने की शक्ति आने से पूर्व अपने बच्चों का अन्य पक्षी (कौए) द्वारा पालन-पोषण करा लेती हैं॥ २३॥

शकुन्तला—**(क्रोध के साथ)** अरे अधम! (ओ अनार्य!) तुम अपने कपटपूर्ण हृदय के समान सबका हृदय समझता है। झूठे धर्म के आवरण से स्वयं को ढाककर तृण से आच्छादित कुँए के समान तुम जैसा पाखण्डी और कौन होगा?

Untaught cleverness is seen (even) of females other than human, what then of those who are possessed of reason? Indeed, the female cuckoos get their young ones reard by other birds, before they are able to fly in the space (sky). (23)

Śakuntalā—Ignoble man! you judge by the measure of your own heart. Who else now will undertake to imitate you, who wearing (entering) the cloak of virtue, resemble a well, covered up with grass?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(आत्मगतम्) वनवासादविभ्रमः पुनरत्रभवत्याः कोपो लक्ष्यते। तथाहि—

न तिर्यगवलोकितं भवति चक्षुरालोहितं
वचोऽतिपरुषाक्षरं न च पदेषु सङ्गच्छते।
हिमार्त्त इव वेपते सकल एव बिम्बाधरः
प्रकामविनते भ्रुवौ युगपदेव भेदं गते॥ २४॥

परायणस्य, अत एव तृणैः छन्नः=आवृतमुखः, यः कूपः स एवोपमा=उपमानं, यस्य तस्य तृणछन्न-कूपोपमस्य=तृणच्छन्नो हि कूपः स्थलबुद्ध्या जनान् पातयति तद्वदन्तर्नृशंसस्य, तव=भवतः अनुकारी=अनुकरणकर्त्ता, कोऽन्यो भविष्यति। त्वत्तुल्यो दुरात्मा नास्ति इति भावः।

राजा—(आत्मगतम्=स्वहृदये) वनवासात्=शैशवात् तपोवननिवासहेतोः, अविभ्रमः=शृङ्गारभावजातविकारशून्यः, अत्रभवत्याः=माननीयायाः, कोपो लक्ष्यते=दृश्यते। (नागररमणीनां तु कोपो न विभ्रमं मुञ्चतीत्यस्या अपूर्व एवायं कोपोऽभिलक्ष्यत इति भावः।) तथाहि—

अन्वयः—(अत्रभवत्याः) अवलोकितं तिर्यग् न किन्तु चक्षुः आलोहितम् (भवति), वचः अतिपरुषाक्षरं च पदेषु न सङ्गच्छते, हिमार्त इव सकल एव बिम्बाधरः वेपते, प्रकामविनते भ्रुवौ युगपदेव भेदं गते॥ २४॥

न तिर्यगिति। अत्रभवत्याः=मुनिकन्यात्वेन मान्यायाः शकुन्तलायाः, अवलोकितं=दृष्टिः, तिर्यक् =वक्रं न (सविभ्रमकोपे तु नागरीणां दृष्टिर्वक्रैव स्यादिति भावः), किन्तु चक्षुः, आ समन्ताद् लोहितम् आलोहितम्=सम्यग्रक्तवर्णं सञ्जातम् (सविभ्रमकोपे तु नागररमणीनां चक्षुर्न सम्यक् लोहितं भवति इत्याशयः), वचः=अनार्य्य इत्यादि भाषितम्, अतिपरुषाणि=अतीव निष्ठुराणि, अक्षराणि=वर्णस्तोमः, यस्य तत् अतिपरुषाक्षरम्, च=किन्तु, पदेषु=लक्ष्येषु, मादृशेषु विषयेषु, न सङ्गच्छते=अतथ्यत्वात्र युज्यते (सविभ्रमकोपकाले तु—नागररमणीनां मुखेभ्य ईदृशं परुषाक्षरं नैव निर्याति निर्गमने तु तथ्यत्वात् पदेषु सङ्गच्छत एव इत्याशयः), हिमार्तः=शीतार्तः इव, सकलः=समग्रावयव एव, बिम्बाधरः=बिम्बफलोपमलोहितवर्णोष्ठः, वेपते=कम्पते, तथा प्रकामविनते=अतिनम्रीभूते,

राजा—(मन में) वनवासिनी होने के कारण इनके कोप में विलास का भाव लक्षित नहीं होता; क्योंकि—

इनके नेत्र लाल हो गये हैं पर वे वक्र नहीं होते, ये यद्यपि कठोर अक्षरों का प्रयोग करती हैं परन्तु वे मुझ पर घटित नहीं होते, सम्पूर्ण अधरोष्ठ इस प्रकार काँपता है मानो हिम से पीड़ित हो एवं दोनों भवें एक साथ ही टेढ़ी होकर झुक जाती हैं॥ २४॥

The king—(Himself) As this is forester, so, in her anger, there never appears any sign of or any feminine gesture indicative of amorous sentiment. For—

Though her eyes have become red but are not tortuous (curved), she uses though cruel (hard) words but they never effecting me. The complete lower lip trambles as if it effected by snow and the both eyebrows have bent down togather at a very moment being curved. (24)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपि च सन्दिग्धबुद्धिं मामधिकृत्य अकैतव इवास्याः कोपः सम्भाव्यते। तथा ह्यनया—

मय्येवमस्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने।
भेदाद् भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य॥ २५ ॥

भ्रुवौ=भ्रूद्वयम्, युगपदेव=समसमयमेव, भेदं=भङ्गलक्षणम्, वक्रताम्, गते=प्राप्ते (सविभ्रमकोपे तु नागरीणां भ्रूयुगलं क्रमिकमेव भेदं गच्छति न तु युगपदेवेति भावः)। अत्र कोपस्याविभ्रमत्व-प्रतिपादनाय तिर्य्यगवलोकनादिरूपनानाविधकारणोपन्यासात् समुच्चयालङ्कारः। केचिदत्र स्वभावोक्तिरिति, हिमार्त्त इव इत्यत्रोत्प्रेक्षा, बिम्बाधर इत्यंशे उपमा। इत्येतेषामलङ्काराणां साङ्कर्य्यं बोध्यम्। श्लोकमिदं पृथ्वीच्छन्दसा निबद्धम्—'जसौ जसयला वसु ग्रहयतिश्च पृथ्वी गुरु' इति पृथ्वीलक्षणम्॥ २४ ॥

अपि च=अन्यच्च, सन्दिग्धा=परिणयविषये संशयाकुला, बुद्धिर्यस्य तं सन्दिग्धबुद्धिम्, माम्=दुष्यन्तम्, अधिकृत्य=लक्ष्यीकृत्य, अस्याः=शकुन्तलायाः, कोपः=क्रोधः, अकैतव इव= कापट्यरहित इव, सम्भाव्यते=उत्प्रेक्ष्यते। तथाहि अनया=शकुन्तलया—

अन्वयः—एवम् अस्मरणदारुणचित्तवृत्तौ मयि रहः वृत्तं प्रणयम् अप्रतिपद्यमाने सति अतिरुषा अतिलोहिताक्ष्या कुटिलयोः भ्रुवोः भेदात् स्मरस्य शरासनं भग्नमिव॥ २५ ॥

मय्येवमिति। एवम्=इत्थम्भूतेन, अस्मरणेन=भूतपूर्वपरिणयादिरूपवस्तूनामस्मृत्या, दारुणा=निष्ठुरा, चित्तवृत्तिः=मनोवृत्तिः, यस्य तस्मिन् अस्मरणदारुणचित्तवृत्तौ, मयि=दुष्यन्ते, **रहः**=एकान्ते निर्जनतपोवनस्थाने, वृत्तं=सञ्जातम्, प्रणयम्=प्रीतिम्, अप्रतिपद्यमाने=धर्म्मध्वंस-भयेनास्वीकुर्वाणे सति, अतिरुषा=अतिक्रोधेन, अतिलोहिते=अत्यन्तरक्तवर्णे, अक्षिणी=नयनद्वयं, यस्याः सा अतिलोहिताक्ष्या, अनया=शकुन्तलया, कुटिलयोः=कुञ्चितयोः, भ्रुवोः भेदात्=भङ्गात्,

---

इसके अतिरिक्त मुझे सन्दिग्धबुद्धि समझकर यह जो क्रोध कर रही है—वह भी कपटरहित ही प्रतीत होता है। जैसे कि इसने—

मुझे (इसे स्वीकार करने की) बात याद नहीं आ रही है अतः मैं इसके लिए दारुण हृदय वाला हो गया हूँ। एकान्त में इसके साथ जो मेरा प्रेम हुआ था उसे क्योंकि मैं मानता नहीं अतः क्रोधातिशय से लाल-लाल नेत्र किये हुए इस रमणी ने मानो अपनी भवों के भेद से मुझ पर प्रहार करने वाले कामदेव के धनुष को ही तोड़ डाला है॥ २५ ॥

Rendering me of doubtful mind, her anger appears, like one free from fraud. For by her—

Where eyes are extremely red, the bow of Kāma is as though, in great anger, snapped asunder at me owing to the knitting of her curved eye-brows (on me) whose mental attitude is (according to her) dreadful owing to forgetfulness and who am not acknowledging the affection thaı developed in secret. (25)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(प्रकाशम्) भद्रे! प्रथितं दुष्यन्तस्य चरितम्, प्रजास्वपीदं न दृश्यत।

शकुन्तला—तुह्मे ज्जेवप्पमाणं जानध धम्मत्थिदिं च लोअस्स।
लज्जाविणिज्जिदाओ जाणंति ण किंपि महिलाओ॥

[यूयमेव प्रमाणं जानीथ धर्मस्थितिञ्च लोकस्य।
लज्जाविनिर्जिता जानन्ति न किमपि महिला:॥ २६॥]

सुट्ठु दाव अत्तच्छंदाणुचारिणी गणिआ समुवत्थिदा। **[सुष्ठु तावदात्मच्छन्दानुचारिणी गणिका समुपस्थिता।]**

स्मरस्य=कामस्य (मयि प्रहर्तुः), शरासनं=धनुः, भग्नमिव=खण्डितमिव (धनुर्भङ्गात् स्मरस्य पुनः प्रहारसम्भावना न स्यादित्याशयः)। श्लोकेऽस्मिन् सापह्नवोत्प्रेक्षालङ्कारः, पदार्थहेतुकं काव्यलिङ्ग-मपि। वसन्ततिलकं वृत्तम्॥ २५॥

भावार्थः—इत्थम्भूत अस्मरणदारुणचित्तवृत्तौ मयि दुष्यन्ते निर्जनतपोवनस्थाने सञ्जात-प्रणयमप्रतिपद्यमाने सति कोपातिशयेन अतिलोहिताक्ष्या अनया शकुन्तलया भ्रुवोः भेदात् मयि प्रहर्तुः कामस्य शरासनं खण्डितमिव, इति तर्कयामि॥ २५॥

(प्रकाशम्=सर्वजनश्राव्यम्) भद्रे=कल्याणि! दुष्यन्तस्य=राज्ञः, चरितम्=आचरणम्, प्रथितम्=लोकेषु प्रसिद्धम्। चरित्रवान् एवायं इति लोकः जानात्येवेति भावः। इदं=चारित्र्यदोषं (असदाचरणम्), प्रजासु अपि=दुष्यन्तशासितजनेष्वपि, न दृश्यते=नोपलक्ष्यते। (तस्मात् यस्य प्रजा एवम्भूताः शासकस्य तस्य ममेदं कुतोऽपि न सम्भवतीत्याशयः।)

शकुन्तला—अन्वयः—यूयम् एव प्रमाणं लोकस्य धर्मस्थितिञ्च जानीथ। किन्तु लज्जा-विनिर्जिता महिलाः किमपि न जानन्ति॥ २६॥

यूयमिति। यूयं=लोकशासितारो राजान एव, प्रमाणं=विधिनिषेधात्मकं शास्त्रम्, लोकस्य=जनस्य, धर्म्मस्थितिं=धर्म्ममर्यादाञ्च, जानीथ=वित्थ। किन्तु, लज्जया विनिर्जिताः=पराभूताः, महिलाः=नार्य्यः, किमपि न जानन्ति=न ज्ञातुं शक्नुवन्ति (जानन्त्योऽपि लज्जाभिभवादेव किमपि

(प्रगट) भद्रे! दुष्यन्त का चरित्र विश्वप्रसिद्ध है, (उसकी) प्रजा में भी यह दोष (चरित्रहीनता) कहीं न दीखेगा।

शकुन्तला—आप ही लोग शास्त्र, लोक तथा धर्म की मर्यादा को जानते हैं और लज्जा से पराजित स्त्रियाँ कुछ जानती ही नहीं?॥ २६॥

ठीक है, (तब यही समझिये) मानो एक स्वेच्छाचारिणी वेश्या आपके सामने उपस्थित है।

(Aloud) Good lady! Duśyanta's character is quite well-known. Yet this in not seen in his subject, too.

Śakuntalā—It seems, that you people only know about the bounds of Śātrās (sacred treatise), worldly affairs and morality, yet the women defeated by washfulness, know nothing about it. (26)

well, (then consider) that as an adulteress (unchaste woman) is present bofore you.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गौतमी—जादे! इमस्स पुरुवंसपच्चएण मुहमहुणो हिअअविसस्स इत्थं समुवगदासि। [**जाते! अस्य पुरुवंशप्रत्ययेन मुखमधोर्हृदयविषस्य हस्तं समुपगतासि।**]

(शकुन्तला पटान्तेन मुखमाच्छाद्य रोदिति।)

शार्ङ्गरवः—इत्थमप्रतिहतं चापल्यं दहति—

अतः परीक्ष्य कर्त्तव्यं विशेषात् सङ्गतं रहः।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम्॥ २७॥

वक्तुं नैव समर्था भवन्ति, अतः भवतः सर्वलोकप्रथितं चरितं सुपरिशुद्धं कथं वाहं ज्ञातुमर्हामि ?)॥ २६॥

सुष्ठु तावत्, आत्मच्छन्दानुचारिणी=स्वेच्छाचारिणी, गणिका=वेश्या, वारयोषित्, समुपस्थिता=सम्प्राप्ता।

गौतमी—जाते=वत्से! पुरुवंशप्रत्ययेन=पुरुवंशोऽतीव सदाशयो महत्त्वपूर्णश्चेति विश्वासेन, मुखे मधु=मधूपमं मधुरं वचनं, यस्य तस्य मुखमधोः, किन्तु हृदये विषं=विषोपमः, यस्य तस्य हृदयविषस्य, अस्य=राज्ञः, दुष्यन्तस्य, हस्तं=करे, समुपगतासि=निपतितासि।

(शकुन्तला पटान्तेन=वसनान्तेन, मुखम्=आननम्, आच्छाद्य=आवृत्य, रोदिति।)

शार्ङ्गरवः—इत्थम्=ईदृशम्, अप्रतिहम्=स्वजनैरप्रतिषिद्धम्, चापल्यम्=चपलताप्रयुक्तमनालोचितकारित्वम् (अज्ञातकुलशीले कन्याया आत्मसमर्पणमित्यर्थः), दहति=सन्तापयति।

अन्वयः—अतः विशेषात् परीक्ष्य रहः सङ्गतं कर्त्तव्यम्। अज्ञातहृदयेषु सौहृदम् एवं वैरीभवति॥ २७॥

अत इति। अतः=अस्माद्धेतोः (अनालोचितकारित्वस्य तापानुबन्धित्वात्), विशेषात्=विशेषतः, परीक्ष्य=कुलशीलादिकं निर्धार्य्य, रहः=एकान्ते, सङ्गतं=गान्धर्वविधिना परिणयम्,

---

गौतमी—पुत्री! तुम पुरुवंश के विश्वास से मुख में अमृत तथा हृदय में विष (रखने वाले) इस (दुष्ट) के हाथ जा पड़ी हो।

(शकुन्तला आँचल में मुख ढाँपकर रोने लगती है।)

शार्ङ्गरव—इस प्रकार की अबाध चपलता आत्मीय जनों को दुःख देती है—इसलिए भलीभाँति परीक्षा करने के पश्चात् ही एकान्त-मिलन करना चाहिए। क्योंकि किसी अज्ञात

***Gautamī*—**Child! through confidence in Purū's race, committed yourself in the hands of such a person who possesses honey in his mouth but poison in his heart.

(Śakuntalā weeps covering her face with the skirt of her garment)

***Śārṅgarava*—**Thus self-committed rashness, when not checked, burns.

Therefore a union, especially (when) in private (secret), should be formed after careful examination. Relation (friendship)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—अयि भोः ! किमत्रभवतीप्रत्ययादेवास्मानसम्भृतदोषैरधिक्षिपन्ति भवन्तः ।

शार्ङ्गरवः—(सासूयम्) श्रुतं भवद्भिरधरोत्तरम् ?

आजन्मनः शाठ्यमशिक्षितो यस्तस्याप्रमाणं वचनं जनस्य।
पराभिसन्धानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाचः॥ २८॥

कर्त्तव्यम्=करणीयं कन्ययेति शेषः। विपरीते बाधकं दर्शयति—अज्ञातेति। न ज्ञातं=नावगतं, हृदयं=मनः, येषां तेषु अज्ञातहृदयेषु पुरुषेषु, सौहृदं=प्रणयः, एवम्=उपस्थितवृत्तान्त इव, वैरीभवति=विद्वेषायते। अत्र अप्रस्तुतप्रशंसा, अर्थान्तरन्यासश्च। पथ्यावक्त्रं वृत्तम्॥ २७॥

भावार्थः—अस्माद्धेतोः कुलशीलादिकं निर्धार्य्य एव एकान्ते परिणयादिकं कर्त्तव्यम्। या विपरीतमाचरति तस्याः सौहृदम् (अज्ञातहृदयेषु कृतप्रणयः) उपस्थितवृत्तान्त इव वैरीभवति। अत एव सावधानतया एवं करणीयमकरणीयं विच्चार्य कार्यं कर्त्तव्यम्॥ २७॥

राजा—अयि भोः ! स्निग्धसम्बोधनम्, अत्रभवत्याः=पूजार्हायाः शकुन्तलायाः, प्रत्ययात्=विश्वासादेव, असम्भृतदोषैः=अकृतदोषैः, अस्मान्=माम्, अधिक्षिपन्ति=वञ्चकत्वेन निन्दन्ति, भवन्तः, किमिति प्रश्ने।

शार्ङ्गरवः—(सासूयम्=गुणेषु दोषारोपणमसूया तत्सहितम्) भवद्भिः=पुरोहितप्रभृतिभिः सभ्यगणैः, अधरोत्तरम्=अपकृष्टमुत्तरम्, श्रुतम्=आकर्णितम्।

अन्वयः—यः आजन्मनः शाठ्यम् अशिक्षितः तस्य जनस्य वचनं अप्रमाणं, यैः पराभिसन्धानं विद्येति अधीयते ते आप्तवाचः सन्तु किल॥ २८॥

आजन्मन इति। यः=जनः, आजन्मनः= जन्मन आरभ्य, शाठ्यं=शठतां, अशिक्षितः=नाध्यापितः, तस्य जनस्य=अशाठ्यवतो जनस्य, वचनं=कथनं, अप्रमाणम्—प्रमीयतेऽनेनेति प्रमाणं,

---

हृदय व्यक्ति से प्रेम कर लेने पर वह प्रेम इसी प्रकार शत्रुत्व रूप में परिणत हो जाया करता है॥ २७॥

राजा—अरे ! क्या केवल इन मान्या की बातों पर विश्वास कर ही आप हम पर आक्षेप लगा रहे हैं ?

शार्ङ्गरव—(**असूयापूर्वक**) क्या आप महानुभावों ने इनका विपरीत उत्तर सुना—

जिसने जन्म से लेकर आज तक कभी धूर्तता नहीं सीखी (जानी) उसकी बात (कथन) तो अप्रामाणिक माना जाय और जिसने विद्या पढ़ने के बहाने केवल धूर्तता ही सीखी है—उसके कथन को आप्तवाक्यवत् प्रामाणिक मान लिया जाय ?॥ २८॥

---

towards those, whose hearts are checked or known, thus turns into hostility. (27)

The king—Ho! why do you, by merely trusting this lady, blaming us with words that involve censure?

Śāriṅgarava—*(With scorn)* Have you heard the inversion of the proper order of things?

The statement of a person, who from his birth has never been taught deceit, is without authority, let those, for sooth, by whom

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—अहो सत्यवादिनः! अभ्युपगतं तावदस्माभिः एवंविधा एवं वयम्, किं पुनरिमामभिसन्धाय लभ्यते?

शार्ङ्गरवः—विनिपातः।

राजा—विनिपातः पौरवैर्लभ्यत इत्यश्रद्धेयमेतत्।

शार्ङ्गरवः—भो राजन्! किमत्रोत्तरैः? अनुष्ठितो गुरुनियोगः, सम्प्रति प्रतिनिवर्त्तामहे वयम्।

तत्र भवतीत्यप्रमाणम्=अयथार्थज्ञानजनकम्। यैः=जनैः, पराभिसन्धानम्=परप्रतारणम्, विद्येति=विद्यात्वेन विभाव्येति, अधीयते=पठ्यते (यथा तथैव शठतापीति भावः), ते=जनाः, आप्ताः=विश्वासयोग्याः, वाचः=वाक्यानि, येषां ते आप्तवाचः=प्रामाणिकाः, सन्तु=भवन्तु, किलेति सम्भावनायाम्। अत्र अप्रस्तुतप्रशंसालङ्कारः, उपजातिर्वृत्तम्॥ २८॥

भावार्थः—आजन्मनस्तपोवनवासिन्या अविदितकैतवायाः शकुन्तलाया एव वचनं प्रमाणम्, न पुनर्विद्यारूपेण परप्रतारणामधीतवतां भवतां वचनं प्रमाणम्। तस्मात् शकुन्तलैव सत्यं वदति न पुनर्भवानिति भावः॥ २८॥

राजा—अहो सत्यवादिनः! अभ्युपगतम्=अङ्गीकृतम्, तावदस्माभिः=मया, एवंविधाः=भवदुक्तप्रकाराः परप्रतारणपरायणा एव, इमां=शकुन्तलाम्, अभिसन्धाय=प्रतार्य, किं=फलम्, पुनर्लभ्यते=अर्ज्यते? (सर्वत्र प्रतारणे किमपि फलं दृश्यते किन्तु अस्याः प्रतारणे कस्यचिद् फलस्यालाभाद् व्यर्थैव प्रतारणेति मन्ये।)

शार्ङ्गरवः—विनिपातः=अधोगतिः, इमामभिसन्धाय लभ्यत इत्यनुषङ्गः।

राजा—पौरवैः=पुरुवंशिभिः, विनिपातः=अधोगतिः, लभ्यते, इति=एतत्, अश्रद्धेयम्=अप्रत्ययनीयम् (प्रतारणायामपि तेषां नैव विनिपातः सम्भविष्यतीति भावः।)

राजा—ओ सत्यवादियो! मैं मानता हूँ कि आपके कथनानुसार मैं धोखेबाज हूँ, परन्तु इन्हें धोखा देकर मुझे क्या लाभ होगा?

शार्ङ्गरव—अधोगति (सत्यानाश)।

राजा—पुरुवंशियों की अधोगति भी भला कहीं सम्भव है? इस पर विश्वास ही नहीं हो सकता।

शार्ङ्गरव—राजन्! अब उत्तर-प्रत्युत्तर से क्या लाभ? हमने गुरु की आज्ञा पूरी कर दी, अब हम लौट रहे हैं—

---

the deceiving of others is studied as a science, be of authoritative words or the statement of those who have learnt deceiving the others as a science is acceptable an authority. (28)

The king—O' truth-teller! we for a while admit this. What however, is to be gained by having deceived this lady?

Śārṅgarava—Downfall.

The king—The downfall is saught after by Purū's descendants is not credible.

Śārṅgarava—O' king! what is the use of replying? The

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदेषा भवतः पत्नी त्यज वैनां गृहाण वा।
उपयन्तुर्हि दारेषु प्रभुता सर्वतोमुखी॥ २९॥

गौतमी! गच्छाग्रतः। (इति सर्वे प्रस्थिताः।)

शकुन्तला—अहं दाणिं इमिणा किदवेण विप्पलद्धा, तुह्मे वि मं परिच्चअध। **[अहमिदानीमनेन कितवेन विप्रलब्धा, यूयमपि मां परित्यजथ।]** (इत्यनुप्रस्थिता)

शार्ङ्गरवः—भो राजन्! अत्र=एतस्मिन् विषये, उत्तरैः=प्रतिवचनैः, किं=किं फलम्? गुरोः= कण्वस्य, नियोगः=आदेशः, अनुष्ठितः=सम्पादितः, अस्माभिरिति शेषः, सम्प्रति=इदानीम्, वयम्, प्रतिनिवर्त्तामहे=आश्रमं प्रति गच्छामः।

अन्वयः—तद् एषा भवतः पत्नी, एनां त्यज वा गृहाण वा। हि उपयन्तुः दारेषु सर्वतोमुखी प्रभुता॥ २९॥

तदिति। तद्=तस्मात् (यतो वयमनुष्ठितगुरुनियोगा गमनोत्सुकाश्च तस्मात्), एषा=शकुन्तला, भवतः पत्नी=गान्धर्वविधिना परिणीतत्वात् त्वयैव भार्या, अत एव एनां= शकुन्तलाम्, त्यज वा, गृहाण वा। हि=यतः, उपयन्तुः=वोढुः, दारेषु=पत्न्याम्, सर्वतोमुखी= सर्वप्रकारा, प्रभुता=कर्त्तृत्वं वर्त्तते। अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः। पथ्यावक्त्रं वृत्तम्॥ २९॥

भावार्थः—दारेषु विषये पत्युः सर्वविधकर्त्तृत्वभावादस्यां विषये ग्रहणत्यागादिभिर्य- थेच्छाचरणे स्वतन्त्रो भवान्, नास्माकमत्र विशेषवचनावसर इति भावः॥ २९॥

गौतमी! अग्रतः=पुरतः, गच्छ। (इति=इत्युक्त्वा, सर्वे=शार्ङ्गरवशारद्वतौ गौतमी च, प्रस्थिताः=निर्गताः।)

शकुन्तला—इदानीम्=साम्प्रतम्, अहम्=शकुन्तला, अनेन=पुरःस्थितेन, कितवेन=धूर्त्तेन राज्ञा, विप्रलब्धा=वञ्चिता, यूयमपि, मां=शकुन्तलां, परित्यजथ=परित्यज्य गच्छथ। (इत्यनु- प्रस्थिता)

यह आपकी पत्नी है, आप इसे अपने पास रखिए अथवा छोड़ दीजिए; क्योंकि पत्नी पर पति की सब प्रकार से प्रभुता रहती है॥ २९॥

गौतमी! आगे चलो (बढ़ो)। **(सबका प्रस्थान)**

शकुन्तला—अभी इस धूर्त ने मुझे ठगा ही है, क्या आप लोग भी मुझे छोड़कर जा रहे हैं? **(उनके पीछे जाती है)**

---

preceptors command has been executed. We shall return (to the hermitage). So—

Here is your wife, abandon (refuse) her or accept, for authority over the wife is admitted to be all-extending. (29)

Gautamī! Go ahead. *(Thus all setting forth)*

Śakuntalā—How, have I been deceived by this villain? Do you also forsake me? *(Starts after)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गौतमी—(स्थित्वा परिवृत्यावलोक्य च) वच्छ! संगरव! अणुगच्छदि ण्णो करुणपरिदेविणी सउंतला, पच्छादेसपरुसे भत्तरि किं करेदु तवस्सिणी। **[वत्स शार्ङ्गरव! अनुगच्छति नः करुणपरिदेविनी शकुन्तला, प्रत्यादेशपरुषे भर्त्तरि किं करोतु तपस्विनी।]**

शार्ङ्गरवः—(सरोषं प्रतिनिवृत्य) आः पुरोभागिनि! किमिदं स्वातन्त्र्यमवलम्बसे?

(शकुन्तला भीता वेपते।)

शार्ङ्गरवः—शकुन्तले! श्रृणोतु भवती!

यदि यथा वदति क्षितिपस्तथा त्वमसि किं पुनरुत्कुलया त्वया।
अथ तु वेत्सि शुचि व्रतमात्मनः पतिगृहे तव दास्यमपि क्षमम्॥ ३०॥

गौतमी—(स्थित्वा=गमनान्निवृत्य, परिवृत्य=किञ्चित् परिक्राम्य, च अवलोक्य=दृष्ट्वा) वत्स शार्ङ्गरव! करुणेन=करुणरसेन, परिदीव्यति=विलपतीति सा करुणपरिदेविनी, शकुन्तला, नः=अस्मान्, अनुगच्छति=पश्चादागच्छति, प्रत्यादेशेन=प्रत्याख्यानेन, परुषे=दारुणे, प्रत्यादेशपरुषे, भर्त्तरि=स्वामिनि विषये, तपस्विनी=करुणाविक्लवा, किम्=अस्मदनुसरणादन्यत्, करोतु।

शार्ङ्गरवः—(सरोषम्=सकोपम्, प्रतिनिवृत्य) आः=कोपे, पुरोभागिनि=दोषैकदर्शिनी, किम्=कथम्, इदम्=अस्मदनुसरणरूपम्, स्वातन्त्र्यम्=स्वाधीनताम्, अवलम्बसे=आश्रयसि। (भर्तारमेवाश्रय, मास्माननुसर इति भावः।)

(शकुन्तला, भीता=भययुक्ता सति, वेपते=कम्पते।)

शार्ङ्गरवः—शकुन्तले! भवती=त्वम्, श्रृणोतु—

अन्वयः—क्षितिपः यथा वदति यदि त्वं तथासि तदा उत्कुलया त्वया किं पुनः? अथ तु यदि आत्मनः व्रतं शुचि वेत्सि तदा पतिगृहे दास्यं तव क्षमम्॥ ३०॥

गौतमी—(**रुककर और घूमकर देखकर**) पुत्र शार्ङ्गरव! शकुन्तला करुण विलाप करती हुई हमारे पीछे आ रही है। यह तपस्विनी इस प्रकार त्यागने के लिए उद्यत पति से और क्या कह सकती है?

शार्ङ्गरव—(**क्रोध के साथ घूमकर**) अरी दोषकर्त्री! अब क्या तू स्वतन्त्रता का अवलम्बन करना चाहती है?

(शकुन्तला भय से काँपती है।)

शार्ङ्गरव—शकुन्तले! सुनो—

यदि राजा दुष्यन्त जैसा कहते हैं, तुम वैसी ही हो तब तो तुम्हारे जैसी कुलबोरनी से

Gautamī—(Stoping, roaming about and observing) Child Śārṅgarava! here Śakuntalā, weeping piteously, is following us. What can this poor girl do, when her husband is harsh repudiation?

Śārṅgarava—(Turning angrily) Wanton girl! do you resort to independence?

(Śakuntalā trambles in fright)

Śārṅgarava—Śakuntalā! hear me—

If you are as the king syas, what we have to do with you or

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तिष्ठ, साधयामो वयम्।

राजा—भोस्तपस्विन्! किमत्रभवतीं विप्रलभसे? कुतः—

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः॥ ३१॥

यदीति। क्षितिपः=राजा दुष्यन्तः, यथा वदति=न खल्वहमिमां परिणीतवान् इति यद्ब्रवीति, यदि त्वम्, तथासि=तथाविधासि, तदा, उत्कुलया=उल्लङ्घितकुलाचारपद्धत्या, पांसलया, त्वया, किं पुनः=न किमपि फलम् (पुनरित्यत्र क्वचित् पितुरिति पाठः, तत्र पितुः कण्वस्येति ज्ञेयम्)। अथ=पक्षान्तरे, तुशब्दः पूर्वस्माद् विशेषे, यदि आत्मनः=स्वस्य, व्रतं=नियमाचरणं कृत्यं वा, शुचिं=पवित्रम्, वेत्सि=जानासि, तदा, पतिगृहे=दुष्यन्तसद्मनि, दास्यं=परिणये सन्देहात् दासी-भावोऽपि, तव क्षमम्=हितम्। अत्रोत्प्रेक्षा सम्भावना चालङ्कारौ। द्रुतविलम्बितं नाम वृत्तम्॥ ३०॥

भावार्थः—दुष्यन्तेनापरिणीतत्वादन्यस्य तु पतित्वेनाश्रयणात् पापगर्भया व्यभिचारिण्या त्वयास्माकं न किञ्चित् प्रयोजनम्, अतस्त्वं यथेच्छमाचर न पुनरस्माननुगच्छेति भावः। किञ्च यदि राज्ञः यथा कथयति तत्सत्यं तदाऽऽस्माकमनुगमनं न त्वया कार्यम्। किन्तु यदि त्वमात्मनः व्रतं पवित्रमिति वेत्सि तदा त्वयात्रैव स्थित्वा दास्यमङ्गीकृत्य स्थातव्यम्, तदपि शुभाय एव भविष्यति॥ ३०॥

तिष्ठ=त्वमत्रैव वर्त्तस्व, वयं साधयामः=आश्रमपदं गच्छामः।

राजा— भोस्तपस्विन्!=भो तापस! अत्रभवतीं=मुनिकन्यात्वेन पूजनीयां शकुन्तलाम्, कथं विप्रलभसे=विरहयसि, परित्यज्य गच्छसि? कुतः—

अन्वयः—शशाङ्कः कुमुदानि एव बोधयति तथा सविता पङ्कजानि एव बोधयति। हि वशिनां वृत्तिः परपरिग्रहसंश्लेषपराङ्मुखी (भवति)॥ ३१॥

कुमुदानीति। शशाङ्कः=चन्द्रः, कुमुदानि=कैरवाण्येव, बोधयति=उन्मीलयति तथा

क्या लाभ? किन्तु यदि तुम अपने चरित्र को पवित्र समझती हो तो तुम्हें दासी का काम करते हुए यहीं पतिगृह में ही रहना चाहिए क्योंकि वही तुम्हारे लिए हितकर है॥ ३०॥

तुम यहीं रुको, हमलोग जाते हैं।

राजा—ओ तपस्वी! आप इन मान्या को क्यों वियुक्त कर रहे हैं? क्योंकि—

चन्द्र केवल कुमुदिनी को और सूर्य मात्र कमल को ही प्रस्फुटित करता है। इसी प्रकार जितेन्द्रिय धार्मिक जनों की प्रवृत्ति परस्त्रीसंसर्ग से सर्वथा पराङ्मुखी ही रहती है॥ ३१॥

---

what has your father to do with you who have transgressed the family? if, on the other hand, you known your own vow to be,pure, even meanest service in the house of your husband is sufficient for you. (30)

You stay here only (while) we are going.

The king—O' ascetic! why do you deceive this lady?

The moon awakens the night-lotuses only and the sun the

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शार्ङ्गरवः—राजन्! अथ पूर्ववृत्तं व्यासङ्गाद्विस्मृतं भवेत्, तदा कथमधर्मभीरोर्दारापरित्यागः?

राजा—(पुरोधसं प्रति) भवन्तमेवात्र गुरुलाघवं पृच्छामि।

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांशुलः॥ ३२॥

सविता=सूर्यः, पङ्कजानि=कमलान्येव, बोधयति=प्रकाशयति, न पुनः कुमुदानि, हि=यतः, वशिनां=जितेन्द्रियाणां जनानाम्, वृत्तिः=मनोवृत्तिः (किं पुनः प्रवृत्तिरिति भावः), परपरिग्रहस्य=अन्यकलत्रस्य, संश्लेषे=सम्पर्के, पराङ्मुखी=विमुखीभवति। अत्र दृष्टान्त-अप्रस्तुतप्रशंसा-अर्थान्तरन्यासाश्चालङ्काराः। आर्या जातिः॥ ३१॥

भावार्थः—यथा चन्द्रः कुमुदान्येव बोधयति न तु कमलानि, यथा सूर्यः कमलान्येव प्रकाशयति न तु कुमुदानि तथैव जितेन्द्रियाणां धार्मिकाणां मनोवृत्तिः अन्यकलत्रस्य सम्पर्के सर्वथैव पराङ्मुखीभवति॥ ३१॥

शार्ङ्गरवः—राजन्! अथेति प्रश्ने, यद्वा—अथ=यदि, व्यासङ्गात्=कार्यातिशये व्यापृतचित्तत्वाद्, अथवा—व्यासङ्गात्=मोहात्, पूर्ववृत्तम्=पूर्वचरित्रम्, विस्मृतम्=स्मृतिपथाद्विच्युतं भवेत्, तदा अधर्म्मभीरोः=पापाशङ्किनः भवतः, कथं दारापरित्यागः, यदि ते मनसि अधर्मात् भीतिरस्ति तदा दारपरित्यागः कथं क्रियते तत्राप्यधर्मसम्भवादिति।

राजा—(पुरोधसं=पुरोहितं, प्रति=उद्दिश्य) अत्र=अस्मिन् विषये, गुरुलघ्वोर्भावो गुरुलाघवं=ग्रहणाग्रहणयोर्दोषस्य बलाबलम्, भवन्तमेव=त्वां पुरोहितं धर्मकर्मोपदेष्टारमेव, पृच्छामि।

अन्वयः—अहं मूढः स्यां वा एषा मिथ्या वदेत् इति संशये दारत्यागी (भवामि), आहो परस्त्रीस्पर्शपांशुलः (भवामि)॥ ३२॥

मूढ इति। अहम्, मूढः=प्राप्तमोहः (विस्मृतविवाहवृत्तः), स्याम्=भवेयम्, वा=अथवा,

---

शार्ङ्गरव—यदि किसी कारण आप उस अतीतकालीन घटना को भूल गये हों तब क्या आप जैसे धर्मभीरु के लिए इस प्रकार अपनी भार्या का परित्याग करना उचित होगा?

राजा—(पुरोहित के प्रति) इस विषय में मैं आप ही से गौरव और लाघव की बात पूछता हूँ—

मैं विगत घटना भूल गया हूँ अथवा यही मिथ्या बोल रही है, इस दुविधापूर्ण स्थिति में मैं स्त्रीत्याग अथवा परस्त्रीगमन—किस दोष का भागी बनूँगा?॥ ३२॥

---

day lotuses alone. For, the disposition of those who possess control over their senses is averse (unwilling) to embracing another's wife. (31)

***Śāriṅgarava*—**But when you have forgotten what happened before owing to devotion to something else, then now could you be said to be apprehensive of sin?

The king*—*(Address to preceptor) You yourself I ask about the superiority and inferiority in this case.

In the doubt as to whether I may be infatuated (foolish) or

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरोधाः—(विचार्य) यदि तावदेवं क्रियताम्।

राजा—अनुशास्तु मां गुरुः।

पुरोधाः—अत्रभवती तावदाप्रसवादस्मद्गृहे तिष्ठतु।

राजा—कुत इदम्?

पुरोधाः—त्वं साधुनैमित्तिकैरुपदिष्टपूर्वः प्रथममेव चक्रवर्त्तिनं पुत्रं जनयिष्यसीति। स

एषा=शकुन्तला, मिथ्या=अनृतम्, वदेत्, इति संशये=सन्देहे, दारत्यागी=प्राप्तमोहः सन् पत्नीत्यागी भवामि? आहो=किं वा, परस्त्रीस्पर्शेन=परदारग्रहणेन, पांशुलः=कलङ्कितो भवामि? अत्रोत्प्रेक्षा-लङ्कारः। पथ्यावक्त्रं वृत्तम्॥ ३२॥

भावार्थः—स्वपत्नीत्याग-परदारग्रहणजनितोभयविधपापयोः कतरस्य गुरुत्वम् इति भवन्तमेव पृच्छामि। संशयितक्षेत्रे तु परदाराङ्गीकरणापेक्षया तस्याः त्याग एव वरं पातके लाघवादिति भावः॥ ३२॥

पुरोधाः—(विचार्य्य=विचिन्त्य) तावत्=तथा, अस्मिन् विषये संशयाकुलितोऽसीत्यर्थः, तदा, एवं=वक्ष्यमाणरूपम्, क्रियताम्=निश्चीयताम्।

राजा—गुरुः=भवान्, मां=दुष्यन्तं, अनुशास्तु=कर्त्तव्यमुपदिशतु।

पुरोधाः—अत्रभवती=मान्या शकुन्तला, आप्रसवात्=प्रसवपर्यन्तम्, अस्मद्गृहे=अस्माकं भवने, तिष्ठतु=निवसतु।

राजा—इदम्=अस्मद्गृहेऽवस्थानम्, कुतः=कस्माद्धेतोः भवतु?

पुरोधाः—निमित्तं=शुभाशुभलक्षणं, जानन्तीति नैमित्तिकाः=दैवज्ञाः, साधवः=निपुणाश्च, ते नैमित्तिकाश्चेति तैः साधुनैमित्तिकैः, प्रथमम्=आदावेव, चक्रवर्त्तिनं=सार्वभौमं, पुत्रं=तनयं,

---

पुरोहित—(**विचार कर**) यदि ऐसी बात है तो ऐसा करिए।

राजा—आप मुझे कर्त्तव्य का उपदेश दीजिए।

पुरोहित—ये मान्या उस समय तक हमारे घर में निवास करें, जब तक इन्हें प्रसव न हो जाय।

राजा—ऐसा क्यों किया जाय?

पुरोहित—आपको बहुत दिन पूर्व ही भलीभाँति निमित्त को जानने वाले दैवज्ञों ने बता दिया था कि आपका प्रथम पुत्र चक्रवर्ती होगा। इस स्थिति में यदि मुनि कण्व का

---

she may be telling a lie, shall I become the repudiator of my wife or defiled by contact with others wife. (32)

Preceptor—(Thinking) Well, then let this be done.

The king—May your honour instruct me.

Preceptor—Let this lady just stay in our house till delivery.

The king—What for?

Preceptor—You have been addressed by way of prediction by the fortune-teller, that at the very first you will get a son who will be an emperor. If that grand son of Kaṇva be endowed with

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति, ततोऽभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि। विपर्यये त्वस्याः पितुः समीपगमनं स्थितमेव।

राजा—यथा गुरुभ्यो रोचते।

पुरोधाः—(उत्थाय) वत्से! इत इतोऽनुगच्छ माम्।

शकुन्तला—भअवदि वसुंधरे! देहि मे अंतरं। [**भगवति वसुन्धरे! देहि मे अन्तरम्।**]

(इति सह पुरोधसा गौतमीतपस्विभिश्च रुदती निष्क्रान्ता।)

(राजा शापव्यवहितस्मृतिः शकुन्तलागतमेव चिन्तयति।)

जनयिष्यसि=उत्पादयिष्यसि, इति त्वमुपदिष्टपूर्वः=पूर्वमेव सूचितः, चेत्=यदि, सः=गर्भाज्जनिष्यमाणः, मुनिदौहित्रः=कण्वदौहित्रः, तल्लक्षणोपपन्नः=चक्रवर्त्तिलक्षणैर्युक्तः, भविष्यति=सम्भविष्यति, ततः=तदा, एनां=शकुन्तलाम्, अभिनन्द्य=आदृत्य, शुद्धान्तम्=अन्तःपुरम्, प्रवेशयिष्यसि। विपर्य्यये=वैपरीत्ये, तु, अस्याः=शकुन्तलायाः, पितुः=कण्वस्य, समीपगमनं=तपोवनं प्रति प्रत्यावर्तनम्, स्थितमेव=निश्चितमेव।

राजा—यथा गुरुभ्यः=पुरोहितादिभ्यः, रोचते=तथा भवन्तः कुर्वन्तु।

पुरोधाः—(उत्थाय) वत्से=पुत्री! इत इतः=अनेनानेन मार्गेण, मामनुगच्छ=मम पश्चादागच्छत।

शकुन्तला—भगवति वसुन्धरे=धरित्री! मे=मह्यम्, अन्तरम्=अवकाशम्, भवदुदरेति भावः, देहि=प्रयच्छ।

(इति=इत्युक्त्वा, पुरोधसा, गौतमी तपस्विभिश्च सह, रुदती=क्रन्दती, निष्क्रान्ता=निर्गता।)

नाती—जन्म के समय चक्रवर्ती लक्षणों से सम्पन्न हो तो आप इनका अभिनन्दन कर अपने रनिवास में ले जाइयेगा और इसके विपरीत लक्षणों वाला पुत्र उत्पन्न होने पर इनका अपने पिता के पास लौटना तो निश्चित है ही।

राजा—जैसा गुरुजनों को उचित प्रतीत हो, वही करें।

पुरोहित—(शकुन्तला को उठाकर) पुत्री! इधर, इधर मेरे पीछे चली आओ।

शकुन्तला—भगवति वसुन्धरे! मुझे स्थान दो।

(पुरोहित, गौतमी, शार्ङ्गरव आदि के साथ शकुन्तला का प्रस्थान)

(राजा दुर्वासा के शाप से लुप्त स्मृति की दशा में भी शकुन्तला के विषय में ही सोचता है।)

---

signs of that emperor, you will, having congratulaled her, cause her to enter your harem. But the reverse happening taking her to her father is already settled.

The king—As please the elders or preceptor.

Preceptor—Child! follow me this way.

Śakuntalā—Divine earth! give me an opening.

(Exits weeping with the preceptor & the hermits)

(The king, whose remembrance is confounded (obscured) by the curse, thinking over something related with Śakuntalā herself)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(नेपथ्ये) आश्चर्यमाश्चर्यम्।

राजा—(कर्णं दत्त्वा) किन्नु खलु स्यात्?

पुरोधाः—(प्रविश्य सविस्मयम्) देव! अद्भुतं खलु संवृत्तम्।

राजा—किमिव?

पुरोधाः—देव! परावृत्तेषु कण्वशिष्येषु—

सा निन्दन्ती स्वानि भाग्यानि बाला बाहूत्क्षेपं रोदितुञ्च प्रवृत्ता।

(राजा, शापेन=दुर्वाससोऽभिसम्पातेन, व्यवहिता=तिरोहिता, स्मृतिर्यस्य सः शापव्यवहित-स्मृतिः, शकुन्तलागतमेव=तद्विषयमेव, चिन्तयति=चिन्तां नाटयति।)

(नेपथ्ये=परोक्षे) आश्चर्यमाश्चर्यम्=अद्भुतम् अद्भुतम्, अतीव विचित्रं सञ्जातम्।

राजा—(कर्णं=श्रोत्रेन्द्रियम्, दत्त्वा=अवहितीकृत्य) किन्नु इति वितर्के, खल्विति प्रश्ने, स्यादिति सम्भावनायाम्।

पुरोधाः—(प्रविश्य=रङ्गे समागत्य, सविस्मयम्=साश्चर्यम्) देव!=राजन्! अद्भुतम्=विचित्रं, खलु, संवृत्तम्=सञ्जातम्।

राजा—किमिव=कीदृशम्?

पुरोधाः—देव! कण्वशिष्येषु=शार्ङ्गरवशारद्वतादिषु, परावृत्तेषु=स्वाश्रमं प्रति प्रस्थितेषु (तेषां प्रस्थानानन्तरम्)····

अन्वयः—सा बाला स्वानि भाग्यानि निन्दन्ती बाहूत्क्षेपं रोदितुं च प्रवृत्ता।

सेति। सा=पत्या बन्धुभिश्च परित्यक्तत्वादशरणा, बाला=कर्तव्यनिर्धारणेऽसमर्था बाला शकुन्तला, स्वानि=स्वकीयानि, भाग्यानि=अदृष्टानि, निन्दन्ती=अधिक्षिपन्ती सती, बाह्वोरुत्क्षेपो यस्मिन् कर्मणि तद् यथा स्यात्तथेति बाहूत्क्षेपं, रोदितुं=क्रन्दितुं च, प्रवृत्ता=आरब्धवती।

(**नेपथ्य में**) आश्चर्य! आश्चर्य!!

राजा—(सुनकर) क्या हुआ होगा?

पुरोहित— (भीतर आकर विस्मर के साथ) देव! बहुत विचित्र बात हुई।

राजा—कैसी?

पुरोहित—देव! कण्वशिष्यों के लौट जाने पर वह बाला जब अपने भाग्य को कोसती हुई हाथों को झकझोरती हुई रो रही थी।

(Behind the scenes) Wonder! wonder!!

***The king**—(Listening)* What indeed may it be?

***Preceptor**—(Entering with surprise)* your majesty! a miraculous thing has happened.

The king—What is that?

Preceptor—Your majesty! when the pupils of Kaṇva had returned:

That young girl, upbraiding her fortunes began to weep, tossing up her arms—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—ततः किम्?

पुरोधाः—

स्त्रीसंस्थानञ्चाप्सरस्तीर्थमारादुत्क्षिप्याङ्के ज्योतिरेनां तिरोऽभूत्॥ ३३॥

(सर्वे विस्मयं रूपयन्ति।)

राजा—भगवन्! प्रागेवास्माभिरेषोऽर्थः प्रत्यादिष्टः, किं मृषा तर्केणान्विष्यते? विश्राम्यतु भवान्।

राजा—ततः किम्=तदनन्तरं किं सञ्जातम्?

पुरोधाः—अन्वयः—स्त्रीसंस्थानम् अप्सरस्तीर्थं ज्योतिः एनाम् अङ्के उत्क्षिप्य आरात् तिरोऽभूत्॥ ३३॥

स्त्रियाः संस्थानम्=आकृतिरिव संस्थानं यस्य तत् स्त्रीसंस्थानम्=ललनाकारम्, अप्सर एव तीर्थं=योनिरुत्पत्तिस्थानं, यस्य अप्सरस्तीर्थम्, ज्योतिः=कश्चित् तेजःपुञ्जः, एनां=शकुन्तलाम्, अङ्के=क्रोडे, उत्क्षिप्य=निधाय, आरात्=अस्माकं समीप एव, तिरोऽभूत्=अन्तर्धात्। अत्र चकारद्वयप्रयोगात् क्रियासमुच्चयालङ्कारः (प्रवृत्तिरोदनरूपक्रियाद्वयस्य यौगपद्यं), शालिनी वृत्तम्॥ ३३॥

भावार्थः—सा पत्या बन्धुभिश्च परित्यक्तत्वादशरणा शकुन्तला स्वकीयानि भाग्यानि निन्दन्ती सती बाहूत्क्षेपपूर्वकं यदा रोदितुमारब्धवती, तदैव ललनाकारम् अप्सरस्तीर्थं कश्चित्तेजःपुञ्जः एनां अङ्के निधाय अस्मद् पार्श्वे एव तिरोऽभूदित्याश्चर्यकरं वृत्तम्॥ ३३॥

(सर्वे=सर्वे तत्रस्थाः जनाः, विस्मयम्=आश्चर्यम्, रूपयन्ति=अभिनयन्ति।)

राजा—भगवन्! प्रागेव=इतोऽन्तर्धानात् पूर्वमेव, एषोऽर्थः=शकुन्तलालक्षणो विषयः, अस्माभिः=मया, प्रत्यादिष्टः=प्रत्याख्यातः, तर्केण=सा कुत्र गता कया वा नीता इति विचारेण, मृषा=मिथ्या, किमन्विष्यते=अनुसन्धीयते? अनुसन्धानं विहाय, भवान्=त्वम्, विश्राम्यतु=विश्रामं करोतु।

राजा—तब क्या हुआ?

तभी एक स्त्री सदृश आकारवाला मानो अप्सरा की सन्तान हो (अतीव सुन्दर) एक तेजःपुंज (सहसा आकर) उसे अपनी गोद में लेकर अन्तर्धान हो गया॥ ३३॥

(सब आश्चर्य का भाव प्रकट करते हैं।)

राजा—भगवन्! मैंने पहले ही इस बात को टाल दिया है। अब व्यर्थ का तर्क करके अनुसन्धान करने से क्या लाभ? आप अब विश्राम कीजिए।

The king—Then what happened?

Preceptor—And that very moment a luster, in the form of a woman, seems to have born from an apsarā, having lifted her up from a far, disappeared. (33)

(All gesticulate surprise)

The king—Revered sir! even before, that object has already been repudiated by us. Why it is being uselessly pursued by conjecture? Let your reverence take rest.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरोधाः—विजयस्व। (इति निष्क्रान्तः।)

राजा—वेत्रवति! पर्याकुलोऽस्मि, शयनीयगृहमार्गमादेशय।

प्रतीहारी—इदो इदो देवो। [**इत इतो देवः।**]

राजा—(परिक्रम्य स्वगतम्)

कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम्।
बलवत्तु दूयमानं प्रत्याययतीव मां हृदयम्॥ ३४॥

(इति निष्क्रान्ताः सर्वे।)

इति पञ्चमोऽङ्कः।

पुरोधाः—विजयस्व=सर्वोत्कर्षेण वर्त्तस्व। (इति=इत्युक्त्वा, निष्क्रान्तः=निर्गतः मञ्चादिति शेषः।)

राजा—वेत्रवति! (प्रतिहार्या नाम्ना सम्बोधनम्) पर्य्याकुलः—अतिशयेन आकुलः=उत्कण्ठायुक्तः, अस्मि=भवामि। शय्यतेऽस्मिन्निति शयनीयं तच्च गृहञ्चेति तस्य मार्गम्=अध्वानम्, आदेशय=वचनेन सूचय (ज्ञापय)।

प्रतिहारी—इत इतः=अनेनानेन मार्गेण, देवः=भवानागच्छतु।

राजा—(परिक्रम्य=कियन्तं पादक्रमं कृत्वा, स्वगतम्=आत्मगतम्)

अन्वयः—प्रत्यादिष्टां मुनेः तनयां परिग्रहं कामं न स्मरामि, तु बलवत् दूयमानं हृदयं मां प्रत्याययतीव॥ ३४॥

काममिति। प्रत्यादिष्टाम्=सम्प्रत्येव निराकृताम्, मुनेः=कण्वस्य, तनयां=दुहितां शकुन्तलाम्, परिग्रहम्=परिणीतां स्वां पत्नीम्, कामं=सम्यक्, न स्मरामि=परिग्रहत्वेन पर्याप्तं न स्मरामि। तु=किन्तु, बलवत्=अत्यर्थमेव, दूयमानम्=क्लिश्यमानम्, हृदयं=मम चेतः, मां=दुष्यन्तम्, प्रत्याययतीव=परिग्रहत्वेन विश्वासमुत्पादयतीव। अत्र स्मरणरूपकारणाभावेऽपि दूयमानत्वरूपकार्योत्पत्तेर्विभावनालङ्कारः। आर्य्या जातिः॥ ३४॥

पुरोहित—आपकी विजय हो। (**प्रस्थान**)

राजा—वेत्रवति! मैं बहुत परेशान हो गया हूँ, शयनगृह का मार्ग दिखाओ।

वेत्रवति—महाराज! इधर पधारें, इधर।

राजा—(**घूमकर मन में**)

इस त्यागी हुई मुनिकन्या का मैंने कभी पाणिग्रहण किया है, यह बात यद्यपि स्मरण

Preceptor*—Be victorious. *(Exit)

***The king*—**Vetravatī! I am perturbed (uneasy), show me the way to the bedroom.

***Vetravatī*—**This way, this way may your majesty proceed.

The king*—*(Walking round. To himself)

Though it is true that I do not remember the repudiated

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः—यद्यपि सम्प्रत्येव निराकृतां मुनेस्तनयां परिणीतां स्वां पत्नीमिव पर्याप्तं न स्मरामि तथापि बलवत् क्लिश्यमानं हृदयं विश्वासमुत्पादयतीव यत् परिग्रहेयमिति।

(इति=इत्युक्त्वा, सर्वे=राज्ञा सह समुपस्थिताः जनाः, निष्क्रान्ताः=प्रस्थिताः ।)

इति पञ्चमोऽङ्कः ।

नहीं आती तथापि मेरा अतिशय व्याकुल मन उस बाला को 'यह मेरी पाणिग्रहीत भार्या' है ऐसा विश्वास करा रहा है ॥ ३४ ॥

(इसके बाद सबका प्रस्थान।)

पञ्चम अङ्क समाप्त।

---

sage's daughter to be my wife, but my heart which is exceedingly aching, as though convinces me. (34)

(Exeunt all)

End of act-V

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चमाङ्कांशोऽङ्कावतारः

(ततः प्रविशति नागरकश्यालः पश्चाद्बाहुबद्धं पुरुषमादाय रक्षिणौ च।)

रक्षिणौ—(पुरुषं ताडयित्वा) अले कुंभिलआ! कधेहि कहिं तुए एशे महामणिभाशुले उक्किण्णणामाक्खले लाअकीए अंगुलीअए शमाशादिदे। **[अरे कुम्भिलक! कथय कुत्र त्वया एतन्महामणिभासुरमुत्कीर्णनामाक्षरं राजकीयमङ्गुलीयकं समासादितम्।]**

पुरुषः—(भीतिनाटितकेन) पशीदंतु पशीदंतु मे भावमिश्शे। ण हग्गे ईदिशश्श अकज्जश्श कालके। **[प्रसीदन्तु प्रसीदन्तु मे भावमिश्राः। नाहमीदृशस्य अकार्यस्य कारकः।]**

अङ्कावतारः—अङ्कः=अङ्कान्तरम्, अङ्गभावेनावतरति=आविर्भवत्यस्मिन्निति अङ्कावतारः। तल्लक्षणं यथा—

'अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः। यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः'॥

(ततः=तदनन्तरम्, प्रविशति=रङ्गभूमावायाति, नागर एव नागरकः=नगरस्य प्रधानरक्षकः, तस्य श्यालः=पत्नीभ्राता, पश्चात् बाहुबद्धं=पृष्ठतो बाहुद्वयं सगमय्य बद्धम्, पुरुषम्=कमपि जनम्, आदाय=गृहीत्वा, रक्षिणौ=प्रहरिणौ च।)

रक्षिणौ—(पुरुषं=व्यक्तिविशेषम्, ताडयित्वा) अरे इति नीचसम्बोधने, कुम्भिलक=चौर! कथय=ब्रूहि, कुत्र=कस्मात् स्थानात् व्यक्तिविशेषाद्वा, त्वया, एतत्=दृश्यमानम्, महामणिना=उपरिनिहितेन महार्घ्यरत्नेन, भासुरम्=उज्ज्वलं, महामणिभासुरम्, उत्कीर्णानि=उपरिक्षुण्णानि, नामाक्षराणि=राज्ञो नामवर्णाः, यस्मिन् तत् उत्कीर्णनामाक्षरम्, राज्ञ इदमिति राजकीयम्=दुष्यन्तसम्बन्धि, अङ्गुरीयकम्=अङ्गुलिमुद्राम्, समासादितम्=प्राप्तम्?

पुरुषः—(भीतेः=भयस्य, नाटितकं=नाटनं, तेन भीतिनाटितकेन) प्रसीदन्तु प्रसीदन्तु=अनुगृह्णन्तु, मे=ममोपरि, भावाः=विद्वांसः, तेषु मिश्राः=श्रेष्ठाः, भावमिश्राः, अहम्, ईदृशस्य अकार्यस्य=चौर्य्यस्य, कारकः=कर्त्ता, न अस्मीति।

(इसके अनन्तर राजा का साला तथा एक मनुष्य के हाथ पीछे बाँधकर दो सिपाहियों का प्रवेश)

दोनों सिपाही—(उस व्यक्ति को पीटते हुए) अरे चोर! बता, जिसमें इतना मूल्यवान् रत्न जड़ा हुआ है तथा राजा का नाम भी जिस पर अंकित है, वह अँगूठी तुझे कहाँ से मिली?

व्यक्ति—(भय का अभिनय करके) आप लोग मुझ पर दया करें। मैं ऐसा बुरा कार्य करने वाला नहीं हूँ।

(Then enter the chief of police staff and after him two guards leading a man bound)

Guards—(Beating) O Thief! tell where you obtained this royal ring, set with a precious gem and having the name of the king engraved on it?

Man—(Gesticulating fear) May your honours be pleased. I am not at all a doer of such act.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकः—किण्णु क्खु शोहणे वह्मणेशि त्ति कंदुअ लज्जा दे परिग्गहे दिण्णे ? [**किन्नु खलु शोभनो ब्राह्मणोऽसीति कृत्वा राज्ञा ते परिग्रहो दत्तः ?**]

पुरुषः—शुणुध दाव, हग्गे क्खु शक्कावदालवाशी धीवले। [**शृणुत तावत्, अहं खलु शक्रावलारवासी धीवरः।**]

द्वितीयः—अले पाअच्चले! किं तुमं अह्मेहिं वशदिं जादिं च पुच्छीअसि ? [**अरे पाटच्चर! किं त्वमस्माभिर्वसतिं जातिञ्च पृच्छ्यसे ?**

नागरकः श्यालः—सूअअ! कधेदु सव्वं अणुक्कमेण, मा अंतरा पडिबंधेअ। [**सूचक! कथयतु सर्वमनुक्रमेण, मा अन्तरा प्रतिबधान।**]

उभौ—जं आवुत्ते आणवेदि। लवेहि ले। [**यदावुत्त आज्ञापयति। लप रे!**]

एकः—किन्नु उपहासपुरस्सरप्रश्ने, शोभनः=आभिजात्यादिगुणसम्पन्नः, ब्राह्मणः=विप्रः, असि, इति कृत्वा=इति विभाव्य, राज्ञा=दुष्यन्तेन, ते=तुभ्यम्, प्रतिगृह्यत इति प्रतिग्रहः=दानपात्रमिति मत्वा अङ्गुरीयकम्, दत्तः ?

पुरुषः—तावत्=मदीयकथनपरिसमाप्त्यन्तम्, शृणुत=आकर्णयत, अहं खलु, शक्रावतारे= गङ्गातीरस्थिततदाख्यग्रामे, वसतीति सः शक्रावतारवासी, धीवरः=कैवर्त्तः।

द्वितीयः—अरे पाटच्चर=चौर! अस्माभिः, त्वं किं वसतिं=वासस्थानम्, जातिञ्च=धीवर-त्वरूपाम्, चकारः समुच्चये, किं पृच्छ्यसे ? इदमङ्गुरीयकं त्वया कुतो लब्धमित्यस्माभिस्त्वं पृष्टो न तु वसतिर्जातिर्वेति भावः।

नागरकः श्यालः—सूचयति=ज्ञापयति, चौरादीनिति सः, तत्सम्बुद्धौ सूचक! इति द्वितीयरक्षिणो नामधेयम्। अनुक्रमेण=आनुपूर्व्येण, सर्वं=सकलं, कथयतु एष इति शेषः, अन्तरा= वाक्यस्य मध्ये, मा प्रतिबधान=प्रतिबन्धं नोत्पादय।

उभौ—यद्=यथा, आवुत्तः=भगिनीपतिः, आज्ञापयति। रे! लप=अनुक्रमेण कथय।

एक—तब क्या तुम नैष्ठिक ब्राह्मण हो, जो राजा ने यह अंगूठी तुम्हें दान में दी है ?

पुरुष—सुनिए तो सही, मैं शक्रावतार (तीर्थ) वासी धीवर हूँ।

दूसरा—अरे चोर! क्या हमने तुम्हारी जाति और निवासस्थान के सम्बन्ध में पूछा है ?

नागरक-श्याल—सूचक! इसे यथाक्रम सब कहने दो, बीच में मत रोको।

दोनों—जैसी स्वामी की आज्ञा।

First (One)—Is it that this is a charity (gift) presented by the king himself, considering you to be a worthy Brāhmaṇa?

Man—Please listen me. I am a fisherman residing at Śakrāvatāra.

Second—O thief! was your caste and residence asked by us?

Śyāla—Soocaka! Let him tell all in order. Do not stop him in the middle.

Both—As your honour commands. Tell your story O' thief!

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धीवरः—शो हग्गे जाल-वलिश-प्पहुदिहिं मच्छबंधणोवाएहिं कुडुंबभलणं कलेमि। **[सोऽहं जाल-बडिशप्रभृतिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि।]**

नागरकः श्यालः—(विहस्य) विसुद्धो दाणिं से आजीवो। **[विशुद्ध इदानीमस्य आजीवः।]**

धीवरः—भट्टके! मा एव्वं भण। **[भर्त्तः! मा एवं भण।]**

शहजं किल जे विणिंदिदे णहु शे कम्मं विवज्जणीअए।
पशुमालणकम्मदालुणे अणुकंपामिदुके वि शोत्तिए॥ १॥

[सहजं किल यद्विनिन्दितं न तु तत् कर्म्म विवर्जनीयकम्।
पशुमारणकर्मदारुणः अनुकम्पामृदुकोऽपि श्रोत्रियः॥ १॥]

धीवरः—सोऽहम्=पूर्वदत्तपरिचयोऽहम्, जालवडिशप्रभृतिभिः—जालं=शाणसूत्रादि-निर्मितमत्स्यग्रहणसाधनविशेषः, वडिशं=मत्स्यग्रहणसाधनभूतदण्डविशेषः, तत्प्रभृतिभिः, मत्स्य-बन्धनोपायैः=मत्स्यधारणसाधनभूतैः, कुटुम्बस्य=पौष्यवर्गस्य, भरणं=पोषणं करोमि।

नागरकः श्यालः—(विहस्य=सोपहासम्) इदानीम्=सम्प्रति, अस्य=धीवरस्य, आजीवः=जीवनालम्बनोपायः, विशुद्धः=पवित्रः (विपरीतलक्षणयातीव जघन्य इति भावः।)

धीवरः—भर्त्तः! एवम्=ईदृशम्, मा भण=न कथय।

अन्वयः—विनिन्दितं यत् सहजं तत् कर्म्म न तु विवर्जनीयकम्। अनुकम्पामृदुकोऽपि श्रोत्रियः पशुमारणकर्म्म दारुणः भवति॥ १॥

सहजमिति। विनिन्दितम्=लोकेषु विगर्हितमपि, यत्=कर्म्म, सहजं=स्वाभाविकं, कुल-क्रमागतं, तत् किल कर्म्म, न तु विवर्जनीयकम्=नैव परित्याज्यं, अनुकम्पया=सर्वप्राणिषु दयया, मुदुकः=सुकुमारप्रकृतिरपि, श्रोत्रियः=वेदविद्ब्राह्मणः, पशुमारणकर्मणा=यज्ञकर्मणि पशुवध-कार्येण, दारुणः=निष्ठुरः भवति। अत्र अर्थान्तरन्यासोऽलङ्कारः। सुन्दरी वृत्तम्॥ १॥

धीवर—मैं जाल, कटिया (वंसी) आदि साधनों से मछली फँसाने का धन्धा (व्यवसाय) करके अपने कुटुम्ब को पालता हूँ।

राजा का साला—(**हँसकर**) जीविका का साधन तो बहुत शुद्ध है।

धीवर—स्वामी! ऐसा न कहें। क्योंकि—

निन्दित होने पर व्यक्ति को कुलपरम्परागत कर्म कभी नहीं छोड़ना चाहिए। दयालु होने पर भी श्रोत्रिय ब्राह्मण यज्ञ में दारुण पशुबलिरूप कर्म करते ही हैं (सहज कर्म होने से उससे विरत नहीं होते)॥ १॥

***Fisherman*—**I effect the maintenance of my family by nets, hooks and other contrivances (deceitful practice) of catching fish.

Śyāla—(Laughing) A holy profession indeed.

***Fisherman*—**Master! say not so.

Whatever censured duty one is born to, should verily not be abandoned, they say. The learned Brāhmaṇa, though kind hearted, is merciless in the business of killing the sacrificial animal. (1)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नागरकः श्यालः—तदो तदो ? **[ततस्ततः ?]**

धीवरः—एंकश्शिं दिअशे मए लोहिदमच्छके पाविदे, तदो खंडशो कप्पिदे। जाव तश्श उदलब्भंतले पेक्खामि, दाव एशे महालअणभाशुले अंगुलीअए पेक्खिदे, पच्चा इध विक्क अत्थं दंशअंते ज्जेव गहिदे भावमिश्शेहिं। एत्तिके दाव एदश्श आगमे। अध मं मालेध कुट्टेध वा। **[एकस्मिन् दिवसे मया रोहितमत्स्यकः प्राप्तः, ततः खण्डशः कल्पितः। यावत् तस्य उदराभ्यन्तरे प्रेक्षे, तावदेतन्महारत्नभासुरम् अङ्गुरीयकं प्रेक्षितम्, पश्चादिह विक्रयार्थं दर्शयन्नेव गृहीतो भावमिश्रैः। एतावान् तावदेतस्य आगमः। अथ मां मारयत कुट्टयत वा।]**

नागरकः श्यालः—(अङ्गुरीयकमाघ्राय) जालुअ! मच्छोदरलब्भंतलगदोत्ति णत्थि संदेहो, जदो अअं आमिसगंधो वाअदि। आगमो दाणिं एदश्श एसो विमरिसिदव्वो ता एव

भावार्थः—तथा दयाशीलोऽपि श्रोत्रियो हिंसात्मकतया बौद्धादिभिर्विनिन्दितमपि पशुमारणकर्म्म यज्ञादौ कुलक्रमागतधर्म्ममिव मत्वा समाचरति तथा अहमपि निन्दितमपि मत्स्या-धारणं कर्म्म समाचरामि। अत एव नाहं निन्दापात्र इति भावः ॥ १ ॥

नागरकः श्यालः—ततस्ततः=तदनन्तरं कथय।

धीवरः—एकस्मिन् दिवसे, मया=मत्स्यजीविना, रोहितमत्स्यकः=मत्स्यविशेषः, प्राप्तः, ततः=प्राप्त्यनन्तरं, खण्डशः=खण्डं, खण्डम्, कल्पितः=कृतः, (खण्डं खण्डं कृत्वा) यावत्=यदा, तस्य=मत्स्यस्य, उदराभ्यन्तरे=उदरान्तरभागे, प्रेक्षे=दृष्टिं निक्षिपामि, तावत्=तदैव, एतत्= भवदीयकरे विद्यमानम्, महारत्नभासुरं=महार्घमणिसमुज्ज्वलम्, अङ्गुरीयकम्=करमुद्रिकाम्, प्रेक्षितम्= अवलोकितम्, पश्चात्, इह=अत्रापणे, विक्रयार्थं, दर्शयन् एव, भावमिश्रैः=माननीयैः, गृहीतः=धृतः। एतावान्=एतावत् परिमितः, एतस्य=अङ्गुरीयकस्य, आगमः=प्राप्तिवृत्तान्तः। अथ= एतच्छ्रवणानन्तरम्, मारयत=ताडयत, कुट्टयत=चूर्णयत वा।

नागरकः श्यालः—(अङ्गुरीयकमाघ्राय) जालुक=प्रथमरक्षिणो नाम तत्सम्बोधनम्,

---

राजा का साला—तब आगे क्या हुआ ? (आगे कहो)

धीवर—एक दिन मुझे (जाल डालने पर) रोहित मत्स्य प्राप्त हुआ। तब मैंने उसके टुकड़े किये। टुकड़े करने पर जब मैंने उसके पेट में झाँककर देखा तो यह रत्नजटित अंगूठी दिखायी पड़ी। इसके पश्चात् उसे बेचने के लिए दिखाते समय मुझे आप लोगों ने पकड़ लिया। इतना ही इसे पाने का वृत्तान्त है। अब आप मुझे मारें या कूटें।

राजा का साला—(अंगूठी को सूंघकर) जालुक! यह अंगूठी मत्स्य के पेट में थी

***Śyāla*—Then (what happened).**

***Fisherman*—**One day I got a fish by name Rohita. When I cut it into pieces and looked inside of the belly of the fish, then this ring was seen sparkling due to preceious jewel. Afterwards, while showing it for sale, I was arrested by your honours. Now beat me or release me. This is the story of its aquisition.

***Śyāla*—**Jāluka! the ring was in the belly of fish, there is no

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लाअउलं ज्जेव गच्छह्म। [जालुक! मत्स्योदराभ्यन्तरगतमिति नास्ति सन्देहः, यतः अयमामिषगन्धो वाति। आगम इदानीमेतस्यैष विमर्ष्टव्यः, तदेतं राजकुलमेव गच्छामः।]

रक्षिणौ—(धीवरं प्रति) गच्छ ले गंठिच्छेदअ! गच्छ। [**गच्छ रे ग्रन्थिच्छेदक! गच्छ।**] (इति परिक्रामन्ति)

नागरकः श्यालः—सूअअ! इध गोउलदुआले अप्पमत्ता पडिपालेध मं, जाव लाअउलं पवेशिअ णिक्कमामि। [**सूचक! इह गोपुरद्वारे अप्रमत्तौ प्रतिपालयत माम्, यावत् राजकुलं प्रविश्य निष्क्रमामि।**]

उभौ—पविशदु आवुत्तो शामिप्पशादत्थं। [**प्रविशतु आवुत्तः स्वामिप्रसादार्थम्।**]

(नागरकः श्यालः परिक्रम्य निष्क्रान्तः)

मत्स्यस्य=रोहितस्य, उदराभ्यन्तरे=जठरकुहरे, गतम् इदमाङ्गुरीयकम्, इति=अस्मिन् विषये, नास्ति सन्देहः, यतः=यस्मात्, अयमामिषगन्धः=मत्स्यमांसगन्धः, वाति=घ्राणविषयीभवति। एतस्य= अङ्गुरीयकस्य, एषः=धीवरोक्तः, आगमः=आगमनवृत्तान्तः, इदानीम्=सम्प्रति, विमर्ष्टव्यः= विवेक्तव्यः, तत्=तस्मात्, एत=आगच्छत, राजकुलम्=राजभवनम् एव गच्छामः।

रक्षिणौ—(धीवरं प्रति=धीवरमुद्दिश्य) गच्छ=अस्माभिःसह राजकुलं चल, ग्रन्थिच्छेदक—ग्रन्थिं छिनत्ति=कृन्ततीति ग्रन्थिच्छेदकः=चौरः, तत्सम्बोधने, रे इति तुच्छसम्बोधने, रे ग्रन्थिच्छेदक=रे चोर! (इति=इत्युक्त्वा, परिक्रामन्ति=राजकुलमुद्दिश्य गमनमभिनयन्ति।)

नागरकःश्यालः—सूचक! इह=अत्र, गोपुरद्वारे=मुख्यप्रवेशद्वारे, अप्रमत्तौ=धीवरं प्रति सावधानौ सन्तौ, प्रतिपालयतं=युवां प्रतीक्षेथाम्। यावत्=यावत्कालपर्यन्तम्, (अहम्) राजकुलम्= राजभवनं, प्रविश्य=गत्वा, निष्क्रमामि=प्रत्यागच्छामि।

उभौ—प्रविशतु, आवुत्तः=भगिनीपतिः, स्वामिनः=राज्ञः, प्रसादार्थं=चौरग्रहणव्यापारे प्रसन्नतालाभार्थम्, स्वामिप्रसादार्थम्।

इसमें कोई सन्देह नहीं, क्योंकि अब भी इसमें से मत्स्यमांस की गन्ध आ रही है। अब इसके प्राप्त होने की जाँच करनी होगी, अतः आओ राजदरबार में चलें।

दोनों सिपाही—(धीवर से) चले रे! गिरहकट चल। **(सब चलते हैं)**

राजा का साला—सूचक! तुम दोनों यहीं मुख्य द्वार पर सावधानीपूर्वक ठहर कर मेरी प्रतीक्षा करो। जब तक मैं राजभवन में जाकर लौटता हूँ।

दोनों सिपाही—आप महाराज को प्रसन्न करने के लिए भीतर जायें।

---

doudt. Stinking of raw flesh clear this doubt. Now his aquisition of the ring must be thought over. Let us go to the palace itself.

***Both**—(To fisherman)* Proceed, O' cutpurse (pickpocket, thief).

Śyāla—Soocaka, watch this man carefully at the main gate, till, having reported to his majesty and having received his command I come out.

Both—Let your honour enter to please the master.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूचकः—जालुअ! चिलाअदि क्खु आवुत्ते। [**जालुक! चिरयति खल्वावुत्तः।**]

जालुकः—णं अवशलोवशप्पणीआ लआवो होंति। [**ननु अवसरोपसर्पणीया राजानो भवन्ति।**]

सूचकः—फुल्लंति मे अग्गहत्था इमं गंथिच्छेदअं वावादिदुं। [**स्फुरतो मे अग्रहस्तौ इमं ग्रन्थिच्छेदकं व्यापादयितुम्।**

धीवरः—णालिहदि भावे अआलणमालके भविदुं। [**नार्हति मावः अकारणमारको भवितुम्।**]

जालुकः—(विलोक्य) एशे अह्माणं इश्शले पत्ते गेह्णिअ लाअशाशणं आअच्छदि। शंपदं एशे शउलाणं मुहं पेक्खदु, अहवा गिद्धशिआलाणं वली होदु। [**एषः अस्माकमीश्वरः**

(नागरकः श्यालः=प्रधानारक्षी, परिक्रम्य=राजकुलप्रवेशमभिनीय, निष्क्रान्तः=निर्गतः।)

सूचकः—जालुक! आवुत्तः=भगिनीपतिः, चिरयति=विलम्बते, खलु इति प्रश्ने।

जालुकः—ननुरनुप्रश्ने, अवसरोपसर्पणीयाः=अवकाशेन उपगन्तव्याः, उपगम्य निवेदनीया इत्यर्थः, राजानः भवन्ति। (प्रायेण राज्ञां नानाकार्य्यव्यासक्ततया तैः सहालापः सर्वदा न सुकर इति भावः।)

सूचकः—मे=मम, अग्रहस्तौ=हस्तयोरग्रभागौ (करतलौ), स्फुरतः=स्पन्देते, इमं=पुरतःस्थितं, ग्रन्थिच्छेदकं=चौरं, व्यापादयितुम्=मारयितुम्।

धीवरः—भावः=भवान्, अकारणमारकः=अनिमित्तकघातुकः (विना दोषं हन्ता), भवितुम्=''भवितुम्, नार्हति=न योग्योऽसि।

जालुकः—(विलोक्य=दृष्ट्वा) एषः=पुरो दृश्यमानः, अस्माकम्, ईश्वरः=प्रभुः, राजशा-

---

(राजा का साला घूमकर बाहर निकल जाता है।)

सूचक—जालुक! स्वामी देर कर रहे हैं।

जालुक—अवसर पाकर ही राजा के पास पहुँचा जाया करता है।

सूचक—इस गिरहकट का वध करने के लिए मेरे हाथ फड़क रहे हैं।

धीवर—आपके लिए अकारण वधिक बनना उचित नहीं है।

जालुक—(**देखकर**) हमारे स्वामी पत्र में महाराज की ''ाज्ञा लिये इधर ही आ रहे

(The brother-in-law of the king exits after roaming about)

***Sūcaka*—**Jāluka! his honour is indeed delaying.

***Jāluka*—**Why! kings have to be approached at their leisure or at the proper time only.

***Sūcaka*—**My hands are throbbing to cut the head of this fisherman.

***Fisherman*—**It behoves not your honour to be a slaughterer without reason.

***Jāluka*—**Here our master, letter in hand, having received the

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पत्रे गृहीत्वा राजशासनमागच्छति। साम्प्रतमेषः स्वकुल्यानां मुखं प्रेक्षताम्, अथवा गृध्रशृगालानां बलिर्भवतु।]

नागरकः श्यालः—(प्रविश्य) सिग्घं सिग्घं एदं ····! [**शीघ्रं शीघ्रमेतम्····।**]

(इत्यर्द्धोक्ते)

धीवरः—हा हदोह्मि। [**हा हतोऽस्मि।**] (इति विषादं नाटयति।)

नागरकः श्यालः—मुंचध जालोवजीविणं। उववण्णे से अंगुलिअस्स आगमे, अह्म शामिणा जाव कधिदं। [**मुञ्चतं जालोपजीविनम्। उपपन्नः अस्य अङ्गुलीयकस्य आगमः, अस्मत्स्वामिना यावत् कथितम्।**]

सनम्=राजाज्ञाम्, पत्रे गृहीत्वा=पत्रे लिपिबद्धं कृत्वा, आगच्छति=समायाति। साम्प्रतम्=इदानीम्, एषः=धीवरः, स्वकुल्यानां=स्वकीयपुत्रपौत्रादीनाम्, मुखम्=आननम्, प्रेक्षतां=पश्यतु (मुक्तो भवतु), अथवा गृध्रशृगालानाम्=आमिषभोजीनाम्, बलिः=भक्ष्यः, भवतु=दण्डेन व्यापादनादिति भावः।

नागरकः श्यालः—(प्रविश्य) शीघ्रं शीघ्रमेतम्=शीघ्रमेतं मुञ्चतं जालोपजीविनम्, इति पूर्णवाक्यस्य 'शीघ्रं शीघ्रमेतम्' इत्यर्द्धांशे कथिते····

धीवरः—हा इति खेदे, हतोऽस्मि=व्यापादितोऽस्मि। (इति=इत्युक्त्वा, विषादं=विषण्णताम्, नाटयति=अभिनयति।)

नागरकः श्यालः—मुञ्चतं=त्यजतम्, जालोपजीविनम्=धीवरम्, अस्य=प्राप्तस्य, अङ्गुलीयकस्य=राजमुद्रिकायाः, यावत्=यतः, आगमः=प्राप्तिवृत्तान्तः, उपपन्नः=युक्तियुक्तः (सत्यमेवोक्तमनेनेति भावः), इति अस्मत्स्वामिना=राज्ञा दुष्यन्तेन, कथितम्।

हैं। अब यह या तो (मुक्त होकर) अपने परिवारिकों का मुख देखेगा या गिद्ध और सियारों का आहार (बलि) बनेगा।

राजा का साला—(प्रवेश करके) शीघ्र, बहुत शीघ्र इसे····**(आधा वाक्य कहकर)**

धीवर—हाय! मैं मारा गया। **(ऐसा कहकर विषाद का अभिनय करता है।)**

राजा का साला—इस धीवर को छोड़ दो। अँगूठी प्राप्त होने की बात इसने ठीक-ठीक बतायी है। ऐसा महाराज कहते हैं।

---

royal command, is seen in this direction. Now, either this will be able to see the faces of his kinsman or will be an oblation for vulture, jackal etc.

Śyāla—*(Entering)* Let this man be........*(Saying half sentence)*

Fisherman—Oh, I am killed. *(Gesticulate of sorrow)*

Śyāla—Let this fisherman be released. The finding of the royal ring (by him) is consistent compatible.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूचकः—जहा आणवेदि आवुत्ते। जमवशदिं गदुअ पडिणिउत्ते क्खु एशे। [**यथा आज्ञापयति आवुत्तः। यमवसतिं गत्वा प्रतिनिवृत्तः खल्वेषः।**]

(इति धीवरं बन्धनान्मोचयति)

धीवरः—भट्टके! शंपदं तुह कीलके मे जीविदे। [**भर्त्तः! साम्प्रतं तव क्रीतकं मे जीवितम्।**] (इति पादयोः पतति)

नागरकः श्यालः—उट्ठेहि एस भट्टिणा अंगुलीअ-मुल्लसंमिदे पारिदोसिए दे प्पसादीकिदे, ता गेह्ण एदं। [**उत्तिष्ठ, एतत् भर्त्रा अङ्गुरीयमूल्यसम्मितं पारितोषिकं ते प्रसादीकृतं; तत् गृहाण इदम्।**] (इति धीवराय कटकं ददाति)

धीवरः—(सहर्षं सप्रणामञ्च प्रतिगृह्य) अणुग्गहीदोह्मि। [**अनुगृहीतोऽस्मि।**]

सूचकः—यथा आवुत्त आज्ञापयति तथा कुर्म्मः। यमवसतिं=यमसदनं, गत्वा=प्राप्य, एषः=धीवरः, प्रतिनिवृत्तः=सौभाग्यात् प्रत्यायतः खलु।

(इति=एवमादिष्टः संन्, धीवरं=मत्स्यजीविनं, बन्धनात्=पाशात्, मोचयति=मुञ्चति।)

धीवरः—भर्त्तः=स्वामिन्! साम्प्रतम्=इदानीम्, मे=मम, जीवितम्=जीवनम्, तव=त्वया, क्रीतकम्=क्रयीकृतम् (तव दययैवाद्य मम प्राणसंरक्षणं जातमिति भावः)। (इति=इत्युक्त्वा, पादयोः=चरणयोः, पतति।)

नागरकः श्यालः—उत्तिष्ठ, एतत्=धनादिकं दर्शयन्, भर्त्रा=राज्ञा दुष्यन्तेन, अङ्गुरीय-मूल्यसम्मितम्=अङ्गुरीयकमूल्यपरिमितमूल्यकम्, पारितोषिकं=पुरस्कारः, ते=तुभ्यम्, प्रसादी-कृतम्=प्रसन्नतया दत्तम्, तत्=तस्मात्, इदम्=धनम्, गृहाण=स्वीकुरु। (इति=इत्युक्त्वा, धीवराय=जालोपजीविनम, कटकं=वलयम्, ददाति=प्रयच्छति।)

धीवरः—(सहर्षं=प्रसन्नतापूर्वकम्, सप्रणामञ्च=नमस्कारपूर्वकञ्च, प्रतिगृह्य=गृहीत्वा) अनुगृहीतोऽस्मि=कृतानुग्रहोऽस्मि।

सूचक—जैसी स्वामी की आज्ञा। निश्चय ही यह यमराज के घर जाकर लौट आया है। (**ऐसा कहकर धीवर को बन्धन-मुक्त कर देता है।**)

धीवर—स्वामी! अब आपने मेरा जीवन खरीद लिया है (जीवनदान दिया है)। (**यह कहकर चरणों में गिर पड़ता है।**)

राजा का साला—उठो, महाराज ने अँगूठी की कीमत का यह पुरस्कार दिया है, इसे स्वीकार करो। (**यह कहकर धीवर को कड़ा देता है।**)

धीवर—(**प्रसन्नतापूर्वक तथा प्रणामपूर्वक लेकर**) मैं अनुगृहीत हुआ।

Sūcaka—As your honour says. Certainly this one entering Yama's abode he has returned. *(Makes the man free from boundage)*

Fisherman—Master! you have bought my life. *(Bows at his feet)*

Śyāla—Arise, here his majesty has given this prize equal to the ring, accept it. *(Gives a bangle to the fisherman)*

Fisherman—*(Accepting with a bow, happily)* Master! I am favoured.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जालुकः—एशे क्खु लण्णा तधा अणुग्गहीदे, जधा शुलादो ओदालिअ इत्थिक्खंधे शमालोविदे। **[एष खलु राज्ञा तथा अनुगृहीतः, यथा शूलादवतार्य्य हस्तिस्कन्धे समारोपितः।]**

सूचकः—आवुत्ते! पालितोशिएण जाणामि महालिहलदणेण अंगुलीअएण शामिणो बहुमदेण होदव्वं। **[आवुत्त! पारितोषिकेण जानामि महार्हरत्नेन अङ्गुरीयकेण स्वामिनो बहुमतेन भवितव्यम्।]**

नागरकः श्यालः—ण तस्सिं भट्टिणो महालिहलदणं त्ति कदुअ परिदोसो। एत्ति उण तक्केमि। **[न तस्मिन् भर्तुर्महार्हरत्नमिति कृत्वा परितोषः। एतत् पुनस्तर्कयामि।]**

उभौ—किं उण? **[किं पुनः?]**

जालुकः—एषः=धीवरः, राज्ञा=दुष्यन्तेन, तथा=तेन रूपेण (पुरस्कारद्वारा), अनुगृहीतः=अनुकम्पितः, यथा शूलात्=मारणसाधनभूतकीलकात्, अवतार्य, हस्तिस्कन्धे=गजोपरि, समारोपितः=संस्थापितः (वध्यो राजसम्मितं पारितोषिकं ग्राहितः।)

सूचकः—आवुत्त=भर्तः! पारितोषिकेण=धीवराय पुरस्कारदानेन, जानामि=निश्चिनोमि, महार्हरत्नेन=बहुमूल्यमणिसद्भावेन हेतुना, अङ्गुरीयकेण=अङ्गुलिमुद्रया, स्वामिनः=भर्तुर्दुष्यन्तस्य, बहुमतेन=अतिप्रियेण, भवितव्यम्।

नागरकःश्यालः—तस्मिन्=अङ्गुरीयके, भर्तुः=स्वामिनः, महार्हरत्नम्=बहुमूल्यरत्नम्, इति कृत्वा=इत्यस्माद्धेतोः, न परितोषः=नैव सन्तोषः, एतत्=वक्ष्यमाणम्, पुनः=भूयः, तर्कयामि=सम्भावयामि।

उभौ—किं पुनः=तत्पुनः किम्?

जालुक—महाराज ने इस पर कैसी कृपा की, मानो सूली से उतार कर हाथी के कन्धे पर बिठा दिया।

सूचक—श्रीमन्! पारितोषिक-प्रदान से तो ऐसा प्रतीत होता है कि वह बहुमूल्य रत्न से मण्डित अंगूठी महाराज को विशेष प्रिय है।

राजा का साला—उस अंगूठी में बहुमूल्य रत्न है, इसलिए महाराज को सन्तोष नहीं हैं अपितु मेरा विचार है कि—

दोनों—फिर क्या?

Jāluka—This is indeed a favour of his majesty that being made to descend from the stake, he has been installed on the neck of an elephant.

Sūcaka—Your honour! the reward proclaims that the ring, with its gem of great price, must have been highly valued by his majesty.

Śyāla—Not that the gem of great price there on was highly valued by his majesty, I guess....

Both—Than what?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नागरकः श्यालः—तस्स दंसणेण भट्टिणा को वि अहिमदो जनो सुमरिदो त्ति, जदो मुहूत्तअं पइदिगंभीरो वि पज्जुसुअमणा आसी। **[तस्य दर्शनेन भर्त्रा कोऽप्यभिमतो जनः स्मृत इति, यतो मुहूर्त्तं प्रकृतिगम्भीरोऽपि पर्युत्सुकमना आसीत्।]**

सूचकः—दोसिदे शोइदे अ दाणिं भट्टा अवुत्तेण। **[तोषितः शोचितश्चेदानीं भर्त्ता आवुत्तेन।]**

जालुकः—णं भणेमि इमश्श मच्छशत्तुणो किदे। **[ननु भणामि अस्य मत्स्यशत्रोः कृते।]** (इति धीवरमसूयया पश्यति।)

धीवरः—भट्टालक इदो अद्धं तुह्माणंपि शुलामुल्लं होदु। **[भट्टारक! इतः अर्द्धं युष्माकमपि सुरामूल्यं भवतु।]**

नागरकः श्यालः—तस्य=अङ्गुरीयकस्य, दर्शनेन=अवलोकनेन, भर्त्रा=राज्ञा दुष्यन्तेन, कोऽपि, अभिमतः=अभीष्टः, जनः=व्यक्तिविशेषः, स्मृतः=ध्यातः (मनसि कृतः), इतीतिना तर्कयामि, यतः=यस्मात्, प्रकृतिगम्भीरोऽपि—प्रकृत्या=स्वभावेन, गम्भीरः=धीरोऽपि राजा, मुहूर्त्तम्=क्षणमात्रम्, पर्य्युत्सुकम्=उत्कण्ठितं, मनो यस्य सः पर्य्युत्सुकमनाः, आसीत् (तस्य तदानीमभिमतजनस्मरणं जातम्)।

सूचकः—आवुत्तेन=भगिनीपतिना भवता, भर्त्ता=राजा दुष्यन्तः, इदानीम्=साम्प्रतम्, तोषितः=प्रीणितः, शोचितः=शोकं प्रापितश्च।

जालुकः—ननु इति सम्बोधने, अस्य=पुरःस्थितस्य, मत्स्यशत्रोः=मीनविनाशकस्य धीवरस्य, कृते=निमित्ते, भणामि=कथयामि। (इति=इत्युक्त्वा, असूयया=भ्रूकुटीविकारपूर्वकं दोषारोपेण, धीवरम्=जालोपजीविनम्, पश्यति।)

राजा का साला—उस अंगूठी को देखने से महाराज को कोई प्रियजन स्मरण हो आया और इसीलिए स्वभाव से गम्भीर होते हुए भी वे कुछ देर के लिए विचलित (उत्कण्ठित) हो उठे थे।

सूचक—तो आपने महाराज को प्रसन्न भी किया और चिन्तित भी।

जालुक—मैं तो कहता हूँ कि मत्स्यशत्रु के कारण (महाराज की ऐसी दशा हुई)।

(यह कहकर धीवर को असूया से देखता है।)

धीवर—मान्यवर! इस पुरस्कार-राशि का (कटक मूल्य का) आधा भाग आप लोगों की शराब के लिए होना चाहिए।

Śyāla—(I guess) Its sight reminded his majesty of some beloved person. Though naturally serious, his majesty was perturbed for a moment.

Sūcaka—(I feel through this) You have pleased his majesty and made him gloomy too.

Jāluka—I say, this enemy of the fishes is the cause of the said condition of his majesty.

Fisherman—Master! let half from this be the price of wine to you all.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जालुकः—धीवल! महत्तले शंपदं अह्माणं पिअ वअश्शके शंवुतेशि, कादंबली-शक्खिके क्खु पढमं शोहिदे इच्छीअदि। ता एहि, शुंडिआलअं ज्जेव गच्छह्म। [**धीवर! महत्तरः साम्प्रतमस्माकं प्रियवयस्यः संवृतोऽसि। कादम्बरीसाक्षिकं खलु प्रथमसौहृदमिष्यते, तदेहि, शौण्डिकालयमेव गच्छामः।**]

(इति निष्क्रान्ताः सर्वे)

इति अङ्कावतारः।

धीवरः—भट्टारक=स्वामिन्! इतः=अस्मात् पारितोषिकात्, अर्द्धम्, युष्माकमपि, सुरामूल्यम्=मद्यक्रयणार्हम्, भवतु (युष्मभ्यमपि सुरापानार्थम् इतोऽर्द्धं दातुमिच्छामि इति भावः)।

जालुकः—धीवर! साम्प्रतम्=इदानीम्, महत्तरः=प्रधानतरः, अस्माकम्, प्रियवयस्यः=प्रियसखा, संवृतोऽसि=जातोऽसि। प्रथमसौहृदं=प्रथमसौहार्दम्, कादम्बरी=सुरा, साक्षिणी यस्य तत्तादृशम्, खलु इष्यते लोकैः, तद्=तस्मात्, एहि=आगच्छत, शौण्डिकालयम्=मदिराकारगृहं, मधुपानशालाम् एव, गच्छामः=व्रजामः।

(इति=एवमुक्त्वा, सर्वे=मञ्चोपरि उपस्थिताः जनाः, निष्क्रान्ताः=निर्गताः।)

(अत्राङ्गुरीयकलाभप्रदर्शनार्थो धीवरवृत्तान्तः। किञ्च अङ्गुरीयकदर्शनेन दुर्वासः-शापनिवृत्त्या राज्ञः शकुन्तलास्मरणम्, तेन च विरहाक्रान्ततया पर्य्याकुलचित्तत्वमपि सूचितम्।)

इति पञ्चमाङ्कांशोऽङ्कावतारः।

जालुक—धीवर! इस समय तुम हमारे सर्वश्रेष्ठ मित्र हो गये हो। मद्य को आरम्भिक मित्रता का साक्षी माना जाता है, अतः आओ कलवार के घर (अथवा दुकान) चलें।

(सबका प्रस्थान)

पञ्चमाङ्क का अंशभूत अङ्कावतार समाप्त।

Jāluka—Fisherman! you have now become our dearest friend. With liquor as its witness our first friendship is desired. So let us go to the liqucor-sellers shop itself.

(Exeunt omnes)

End of the Interlude.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection